नं: ५१ - घ

वृहच्छब्देन्दुशेखर ~~द~~ रत्नम्

मनोरमा व्याख्यानम् (पूर्वार्द्धम्

पत्राणि १५१

नं० ५१-घ

बृहद्व्याकरणम्

मनोरमाव्याख्यानम् (पूर्वार्द्धम्)

१५१ पत्रणि

५८-घ

श्री

नं० ५१

बृहच्चक्रबद्धरत्नं

वार्षिकी निव्वाजा जा स्या

भट्टोजिदीक्षितकृतिर्या सिद्धान्तकौमुदीति ख्याता दीक्षितकृता या सा लोके मनोरमा।

तद्व्याख्येयं बृहच्चक्रबद्धरत्नम् संज्ञो[...]विका सिता। आरभ्याजन्तपुंलिङ्ग कारकान्तं मनोहरा।



शब्दरत्न॰ १

॥श्रीगणेशाय नमः॥ तद्धितांतस्येति । कृद्ग्रहणं तु लिङ्यादावधातुरिति निषेधबाधनार्थं । नचैवमप्यापत्यमित्यादौ प्रत्ययस्थेनेति नि-
षेधबाधनार्थं तद्धितांतस्य संज्ञाविधानमस्तु । प्रत्ययस्यातथात्वात् । अत्रत्य हृदूरत्यलौकिकवाक्ये मुख्योपायात् एवं प्रवृत्तायाः संज्ञायाः ए-
कदेशविकृतन्यायेन मूलभूतत्वाच्च । लिहृद्विरित्याद्यामवस्थायां संज्ञाया नैव प्रवृत्तिः फलाभावात् । विलोपस्यांतरंगत्वेन निरस्तत्वेन च
पूर्वं प्रवृत्तेश्च । नचैवमपि नियमार्थमेवास्त्विति वाच्यं । विधिमुखेन प्रवृत्तेरुक्तत्वाद्द्विवचनेन एकादेशस्य एवं तत्त्वेन ग्रहणात्तद्धितांत-
त्वेन संज्ञाप्रवृत्तेः । अस्मते कृत्तद्धितेति सूत्रेऽप्यप्रत्ययान्तस्येत्यनुवर्त्तेते न समासमध्ये तद्धितभिन्नप्रत्ययस्यैव । ग्रहणान्नादोषः । एतदन्यथा-
नुपपत्त्या संकोचकवाक्यकल्पनापेक्षया प्रत्ययस्यावृत्त्या द्वयपरत्वे गौरवाभावाच्च । लक्षणया तद्धितभिन्नप्रत्ययांतस्येने-
ति निषेधमुखेन प्रवृत्तौ स्वार्थहानिः परार्थकल्पनाप्राप्तबाधश्चेति दोषत्रयापत्त्या विपरीतगौरवापत्तेः । नियमस्य सजातीयता-
पत्तौ धातुप्रकृतिकप्रत्ययांतवारणानापत्तेश्च । पाचकइत्यादौ संज्ञाभावापत्तेश्च । नच बाध्यसामान्यचिंतायां अधातुरिति नि-
षेधस्यैव कृतग्रहणेन तद्धितांतनियमस्यापि बाधोस्त्विति वाच्यं । समासनियमस्यापि बाधापत्तेः । नच लिङ्यादावपि तद्धितभिन्न-
प्रत्ययांतस्येनेति नियमबाध्यसामान्यचिंतायां अधातुरिति निषेधस्यैव कृतग्रहणेन तद्धितांतनियमस्यापिबा [redacted]

एमै १

पक्षस्यावश्यकत्वे बाध्यविशेषचिन्तामाश्रयेणापवादकरस्माद्धेर्हंसंज्ञाभविष्यत्येवेति वाच्यं। नङिसंबुद्ध्योरिति ज्ञापकेन प्रत्ययलक्षणेनोक्तनिय
माप्रवृत्तेर्ज्ञापितत्वात्। लिङित्यादौ पूर्वमप्याप्तिप्रातिपदिकसंज्ञाया अप्राप्तत्वेन कृद्ग्रहणाभासेः पूर्वं व्यावर्त्यविषयस्यासंभावितत्वेन
न तद्धितनियमाप्रवृत्तावणुरपि विशेषोऽस्त्वेवसापवादकरस्मादिति न्यायात्यापवादकरत्वाद्धेतोः कृद्ग्रहणस्य मंथरं प्रवृत्त्या परेणात तद्धितनियमे
न बाधाच्च। किं च धातुरिति पर्युदासस्य सत्त्वेन धातोर्विधिनिषेधाभावात् लिङित्यादेशे सावकाशस्य कृद्ग्रहणस्य परत्वेन तद्धितनिय
मेन बाधस्यान्वितत्वात्। अपि च घटोऽस्तीह युवते घटोऽस्तीह परमकाष्ठिगाश्चेरित्यादिवाक्ये समप्रयुक्तनियमं परमपि बाधित्वा लाघ
वाद्विध्यर्थमेव स्यात्। न च समुदायस्यान्ततद्धितान्तत्वं नास्तीति वाच्यं। अनुपसर्जनस्त्रीप्रत्यये न तदादिनियमस्य निषिद्धत्वात्। यद्वितद्धि
तग्रहणमेव पृथग्वाधाकेवलप्रवर्त्तने लाघवाद्बाधस्यान्याय्यत्वाच्चेति चेत्त हि वैयर्थ्यं स्पष्टमेवेति दिक्। तदंतंयात्स्यमिति। सुप्तिङं। तंप
दमिति सूत्रस्थान्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदन्ताग्रहणस्य बोधितत्वात्। ननु उक्तार्थज्ञापितेऽपि प्रत्ययमात्रस्य संज्ञायां
प्रदेशेषु पदशब्देन प्रत्ययग्रहणादिति परिभाषया तदंतग्रहणादिष्टसिद्धौ सुप्तिङंतमिति सूत्रस्थान्तग्रहणं व्यर्थमेवेति चेन्न।
पदशब्दस्य प्रकृतावपि शक्तत्वे न प्रत्ययमात्रे ग्रहणाभावेन पदशब्दे प्रत्ययग्रहणे इति परिभाषया तदंतविधेर्दुर्लभत्वात्। इदं च उ

श. वृ.
२
2

गितश्चेति सूत्रे भाष्ये स्पष्टं । नन्वेवमौपगव इत्यादौ पूर्वसूत्रविहितविशिष्टसंज्ञयैव सुब्लोपस्यैव सुबुत्पत्तेरपि सिद्धत्वेन प्रत्ययमात्रस्य सं
ज्ञायां फलाभाव इति चेन्न । बहुपटव इत्यादौ सुबापत्तेः । समासनियमेन विशिष्टस्य संज्ञानापत्तेश्च । दंडिनौ दंडिन इत्यादौ प्रत्ययोद्देश्यकसु
ब्लोपे सुद्देश्यकसुबुत्पत्त्या चापि नलोपापत्तेश्च । अकारांते रणास्मदभिमतार्थसाधनेन संमतत्वे दोषाभावाच्च । एतेना धातुरिति प्राति
पदिकं कृत्समासश्चेत्येवं सूत्रत्रयं त्यक्त्वा तिप्सिप्स्त्यारभ्य सुपः पकारेण प्रत्याहारः । तेनाद्रिना तिपं तिङं त च वर्जयित्वा इत्यर्थ इत्यपास्तं । वि
करणांतिदोषापत्तेश्चेति यथान्यासमेव करणीयं । अर्थवत्त्वं द्विविधं । पारमार्थिकं काल्पनिकं च । आद्यं तु पदवाक्यवाक्यार्थज्ञानीयं त
दवयवे । प्रत्ययोपादानादाद्यस्यासंभवः । द्वितीये तु न व्यभिचारी स्यात् । शंकामाह । अशं भाष्यामिति । रूपवाचकत्वात् ब्राह्मण इत्यादाविवेति भा
वः । एकार्थीभावेनेति । विशेषणानां समर्थ्यमाणमार्थिकं प्रत्ययासत्त्वमर्थवत्त्वं रक्षति । प्रशस्तसमीपत्वेनान्यापेक्षयाप्रशस्तत्वात् । कृत्त
द्धितश्लोके चेत्प्रत्ययग्रहणपरिभाषया तदंते पि शक्तिविनिभावः । अत एव वाकूटाष्टप्रियस्त्यादौ तद्धितांतत्वात्प्रातिपदिकत्वं न । श्री
सुप्राध्याश्चेति तद्धितांतमात्रस्य प्रयोगाभावे न प्रशस्तार्थवत्त्वाभावात् । पाचक इत्यादौ प्रकृतिप्रत्ययार्थयोः परस्परमात्रान्वयित्वेने
कार्थीभावोस्त्येव । समर्थपरिभाषया चायं त्वेकार्थीभावस्तत्र पदविधिरित्यर्थः । पाचकं पश्येत्यादौ तु विशिष्टस्यैव कर्मत्वादिकमित्याद्याश्रये २

निरूपयिष्यामः॰ व्यर्थं स्यादिति॰ तत्सामर्थ्येनानुमानिकवचनकल्पनापेक्षया तत्रैव तत्कल्पनं युक्तमिति भावः॰ न च प्रकृतिप्रत्यययोस्सुबंतत्वेन
समासः शंक्यः॰ बहुव्रचः चित्रस्यैव प्रथमोपपत्तेः॰ मानांतरत्वे दोषाभावाच्च॰ प्रतिवर्णमिति॰ एकाच द्विर्वचनन्यायस्य तु नायं विषयः॰ समु
दायकार्येणावयवानामनुग्रहात्॰ आनुमानिकवचनकल्पनेन वारणमयुक्तं॰ ननु त्वर्थवत्त्वेनैव सादृश्यं नाम्ना धर्मेणात्यत्र न किं चिन्मा
नमित्याशयमाह॰ एतच्चेति॰ एवं चार्थवत्सदृशामर्थ्यं वर्णानां माभ्यामुक्तं संगच्छते॰ अनेकार्थसंभवेत्र नियुक्तव्याख्यानस्यैव प्रामाण्य
मिति लक्षणसूत्रे आकरे स्पष्टं॰ अत एवासत्त्वार्थकत्वेनापि सादृश्यस्य संभवाद्रूपदेशप्रातिपदिकत्वं न स्यादतोर्थवद्ग्रहणमिति संदोक्त
मयास्तं॰ बहुलस्य संस्कारानुरोधेनोक्तरीत्यैव सादृश्यग्रहस्योचितत्वाच्च॰ औपगवद्यादौ प्रत्ययार्थ एव लिंगसंख्याकारकान्व
यस्य सत्त्वेनाप्रसंगात् इति पर्युदस्येत्युक्तार्थासंभवाच्च॰ उभयोरेकार्थतायायुक्तत्वाच्च तत्तदर्थेति॰ तस्यैतस्येति वीप्सायां द्विर्वचनं॰
ततः तस्यतस्य अर्थ विभाग इति षष्ठीसमासे विभक्तिलुकि उक्तप्रयोगसिद्धिः॰ केचित्तु तस्य तस्यार्थे तद्दिति विभक्तिप्रतिरूपकमव्य
यं शेषं प्राग्वदित्याहुः॰ कल्पित एवेति॰ आत्मबोधकपंचकोशादिवत्कल्पितत्वं॰ एतेन प्रकृतिप्रत्ययविभागादेः काल्पनिकत्वे शश
विषाणाकल्पत्या नित्यस्फोटात्मकज्ञानासंभवदुत्स्यापास्तम्॰ रेखागवयन्यायेन ज्ञापकत्वसंभवाच्च॰ स्फोट इति॰ स्फुटत्यर्थो यस्मादि-

श॰ वृ॰
३
3

तिस्फोटः पदं वाक्यं च वाचकमित्यर्थः॥ तथा हि गामानयेत्यादौ पदैः पदार्थ उक्ते तैर्वाक्येन वाक्यार्थः॥ अत एव घटः कर्मत्वमानयनं कृति
रित्यत्र शक्तिग्रहदशायां लिनो बोधः स एव विपरीत उत्पन्नः अत एव देवदत्तः पचतीति वाक्यात् कृतिप्रकारकदेवदत्तविशेष्यकबोधो न मी
मांसकानां न भावनाविशेष्यकबोधश्च नैयायिकानां॥ समभिव्याहारस्य कारणत्वसिद्धौ वाक्यस्फोटः॥ घटादिपदार्थबोधकतारू
पपदशक्तिज्ञानकार्ये कारणाभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हे
तुत्वकल्पनात्॥ विशिष्टशक्तिग्रहस्तु तदादिवत्कारकविभक्तिविशिष्टपदधातुपदयोर्विशिष्टयोस्तत्कारकविशिष्टक्रियाबोधकत्वमि
तिसामान्यतः॥ अनंतरं पदविशेषसमभिव्याहारे सति तात्पर्यवशात्तदार्थविशिष्टक्रियाबोधः प्राग्विज्ञाते पिहीद्वायां नघाघो
षरीति श्रुते तदानीमेव शक्तिग्रहः॥ तदानीमेव लक्षणया तत्संबंधिनी रमत्यपि वत्तदानीमेव चार्थे वाक्यशक्तिग्रहः॥ यद्वा तात्पर्यज्ञानरू
पामिवापच्छितिमादाय शक्तिग्रहो लौकिक एव॥ वाक्यस्य वाक्यार्थे लक्षणेति वास्तिंमते पि समसमेतत्॥ तथा च विषयतासंबंधेन
शाब्दबोधं प्रति वृत्तिज्ञानस्य जायमानशक्तेर्वा हेतुत्वकल्पनेन लाघवं॥ एतेन पदानां पदार्थेष्विव वाक्यस्य वाक्यार्थे शक्तिपक्षे पदा राम
र्थानामिव वाक्यार्थस्य स्मरणमेव स्यान्नानुभवः॥ संबंधिज्ञानत्वेनैव घटज्ञानवत्तदुपयोगादिति निरस्तं॥ पूर्वं शक्तिग्रहानंगीकारेण ३

दृष्टांतदार्ष्टांतिकयोर्वैषम्यात् । पुष्ठितयघस्य पुनः पठने तज्जन्यशाब्दबोधस्य तिल्वापत्तेश्च । वस्तुतस्तु न तावद्वाक्यार्थप्रतीतिरनुभवः
स्यान्न कादिकं च एवं तोपि स्वर्गं नरकं चानुभवामीत्यप्रतीतेः पदार्थबोधो न स्मरणं । अयमर्थो न स्मृतः तत्तु दुःखार्तितपराहु इत्यनुभव
विरोधात् । पदार्थज्ञाने तत्तानुल्लेखाच्च । तन्नोल्लेखे नियमभंगेनात्र प्रमोषकल्पने चातीव गौरवं । किंच स्मार्यस्मारकतातिरिक्तमूलमसंबं
बंधकल्पनापत्तेः । एकसंबंधिज्ञानमपरसंबंधिस्मारकं न तु स्मारकत्वमेव संबंधः । हस्तिपकादिषु तथादर्शनात् । पदपदार्थयोस्तु बो
धकतातिरिक्तसंबंधकल्पने न किंचिन्मानं । बोधकतातिरिक्तशब्दशक्त्यभावस्यैव व्युत्पादनात् । किंच पदार्थबोधोपि वाक्यार्थवाक्या
र्थबोधवच्छाब्दबोध एव । शाब्दजन्यत्वाविशिष्टत्वात् । शाब्दयामीत्यनुव्यवसायाच्च । परं त्विदं ज्ञानमननुभवरूपं । अज्ञातार्थत्वाभावा
त् । तस्मात् स्मृत्यनुभवातिरिक्तं ज्ञानं प्रमाणबलादायातमंगीकार्थं यं अस्तु वा पदार्थबोधः स्मरणं । तथापि बोधकतातिरिक्ता
शक्तिः परं तोचितेव स्यादुः । यत्तु पदार्थबोधः स्मरणं तथा नामेरान्वयांशे शक्तिः पदार्थांशे शक्तिकल्पनस्यावश्यकत्वेन तत्स्याए
वत्तद्विषयत्वकल्पने लाघवादिति तन्न । ज्ञानरात्ववघटाः स्वतदन्वितं कर्मत्वमित्येवाप्रतीतेः । न घटीयं कर्मत्वं तथा शक्त्यनंगीकारात् । प्र
गुक्तसमभिव्याहारकार्यकारणभावांगीकारे तु प्रक्लिप्तं पदशक्त्या । किंच । घटबोधितस्यान्वयस्य द्वितीयया बोधनेन शक्त्या

श॰ सू॰
४
4

वृत्त्यापत्तेः॰ अपि चान्वयस्यापि प्रमातिपरिकाण्यार्थे तत्भावाच्छेदकषष्ठीसम्बन्धस्यानिर्विषयत्वापत्तेः॰ निलो घट इत्यादौ षष्ठ्यापत्तेरज्ञो घनमित्या
दौ प्रथमापत्तेश्च ध्वनितं चेदं भाष्ये॰ अपि च नानुमितं न प्रमाण्यात्तं किं तु शब्दादवगतमिसन्नुभवानुभवानुभवानुरोधेनैव शब्दप्रामाण्यप
थां गीक्रियते एवं संसर्गो वाक्यार्थ इति॰ किं चद्दत्य नुरोधेन वाक्यवृत्त्यो पक्षश्चाप्येत्वमेव श्यमभ्युपगंतव्यं॰ अन्यथा पदानामपि वपदार्थे
शक्तिर्न सिध्येत्॰ घटादिपदेषु चरमवर्णाशक्त्यान्येषां तात्पर्यग्राहकत्वेन चोपपत्तेः॰ किं च पदार्थेष्वपि वाक्यस्यैव शक्तिः स्यात्॰ युक्ततर
चैतत्॰ गामानयेत्यादौ समुदाये व्युत्पन्नानां समुदायादेव बोधस्यानुभवसिद्धत्वात्॰ प्रथमव्युत्पत्तेर्व्यवहाराधीनतया संपूर्णस्यैव वा
क्यस्य विशिष्टे प्राथमिकशक्तिग्रहस्य निर्विवादत्वात्त्च॰ न चावापोद्वापाभ्यामवयवशक्तिनिर्णयेन तस्याप्रमात्वकल्पनमिति वाच्य
म्॰ असंजातविरोधित्वेनोत्तरकालिकस्येवाप्रमात्वकल्पनात् हरेर्वेत्यादावेकादेशादिस्थले विनिगमनाविरहेणांकैश्चित्सर्वरूपादिस्थले
परलोपाद्यभ्युपगमेन व्याकरणानां कल्पने अवयवशक्तेर्दुरूपपादत्वात्तयाप्राथमिकविशिष्टशक्तिग्रहे प्रमात्वकल्पनस्यावश्यकत्वाच्च॰
न च विशिष्टशक्त्यंगीकारे विशेषणान्वयो न स्यान्न स्यादिति वाच्यं॰ तत्सहितस्यैव वाक्यत्वात्॰ तद्विवक्षायां तु न दोषः॰ न च तत्र शक्ति ग्री
प्रमाद्बोधः सर्वमतसिद्धलघुभूतबोधकतातिरिक्तायाः शक्तेरभावात्॰ पदपदार्थघटितायाः शक्तेर्भमत्वायोगाच्च॰ शक्तिकार्यस्य बोध ४

कृतातिरिक्तायाः शक्तेरभावात् · पदपदार्थघटितायाः शक्तेर्भ्रमत्वायोगाच्च · शक्तिकार्यस्य बोधस्य तायमानत्वेन स्वकल्पितन्यायाभास
विरोधमात्रेण भ्रमत्वकल्पने बीजाभावाच्च · फलाभावाच्च · सर्वस्य सर्वकर्तृपरमेश्वरवाचकशक्तिकल्पनेनैषां शक्तिभ्रमादेव बोधो
पपत्तौ सर्वेषां शब्दानां शक्तिकल्पनानापत्तेश्च · एतेन भाषाशब्दानां न शक्तिरित्यपास्तं · यत्तु भाषाणामनेकत्वान्न शक्तिरिति तन्न प्र
त्येकं मातृप्रविनिगमनाविरहस्याविशिष्टत्वात् · किंच संस्कृते एकत्वं किमेकाकारत्वं · सर्वजनव्यवहार्यत्वं वा · नाद्यः महाराष्ट्र
भाषाया अन्यदेशिव्यवहारेपि एकाकारत्वात् · द्वितीयेपि सर्वजनशब्देन तद्द्विराष्ट्रस्थं ते उत सर्वेपि · आद्ये भाषाया अप्यविशिष्टत्वात् ·
द्वितीये संस्कृतेपि तदभावात् · अपण्डितैस्तेन व्यवहारस्य कर्तुमशक्यत्वात् · छन्नितश्चायमर्थेस्समानायामर्थावगतावित्यादिभाष्य
णा · प्रक्रियारक्षायास्तु बोधवैलक्षण्यमस्त्येव · शक्याबोधे साक्षाच्छब्देनार्थस्मरणं · लक्षणायां तु स्मृतार्थेनार्थान्तरस्य स्मरणं · गौ
ण्यां तु तन्निष्ठगुणसमानजातीयगुणवत्तासंबंधेन तत्त्वारोपः · अत एव रघुपदशब्दयोरपि लक्षणायां साधुत्वं सिद्धं · हशब्दस्य गौण्या ·
अत एव गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इत्यादिव्यवहारास्संगच्छन्ते · स्पष्टं चेदं पुण्यायोगाद्याख्यायामित्याद्रिभाष्यादिग्रंथरत्नाघन्यत्र विस्तरः ·
एतेन तिबादिस्थानीतलकारादीनां बोधकत्वमित्यपास्तम् · लकारमजानतो बोधानापत्तेः · स्थानिनामनन्तत्वाच्च · तं विनापि निर्वाहाच्च · अ

श० वृ०
५
5

अवहितत्वाच्च · स्मारकतावच्छेदकस्यैव शाब्दतावच्छेदकत्वे नलाघवाच्च · ननु सत्तेरभिव्यक्तेर्वा एकदा ऽसंभवेन वर्णसमूहरूपवाक्यज्ञाना-
संभव इति चेन्न · उत्तरवर्णप्रत्यक्षसमये तस्मिन्नव्यवहितोत्तरत्वसंबंधेनापच्छिन्न पूर्वपूर्ववर्णवत्त्वं · एवं तदुत्तरवर्णप्रत्यक्षकाले उपस्थि-
तविशिष्टतद्वर्णवत्त्वं · तस्मिन्नुपगृह्यमिति तादृशानुपूर्वीघटितपदत्वस्यैव वाक्यत्वस्यापि सुग्रहत्वात् · अयमेव सखंडवाक्यस्फोटादिश-
ब्देनोच्यते · तत्र वर्णोप्येक एव · अनन्तवर्णकल्पने मानाभावात् · तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठतत्तद्वर्णजनकताव-
च्छेदकवैजात्यमादायैवोदात्तानुदात्तौ ह्रस्वो दीर्घः प्लुत एषां इत्यादावविवेककारणगकारः इत्यादिप्रतीतिर्वेल॰ श्य एयसंभवात् · अत एवा-
न्योन्याकारः इति प्रतीतिः · एवं चाव्यवहितोत्तरत्वसंबंधेन घवत्त्वं टकारे गम्यते · एतादृशपदज्ञानकारणतायाः अविवादात्त्वात् · पर्या-
येष्वपि घोषाभिवास्माकं तदवच्छेदिकाआनुपूर्वीत्यनुपदमेवोक्तं · तदर्थज्ञापकत्वज्ञानं च ममापि सम्मं · तत्र च चरमवर्णोऽवर्ण एव · न
च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः व्यक्त्यतिरिक्तगत्वानंगीकारात् · भिन्नेषु घटादिषु घटत्वावच्छिन्नप्रतियोगिताक-
भेदाभावस्तद्विषयः · व्यक्त्यतिरिक्तगत्वानंगीकारात् · भिन्नेषु घटादिषु घटत्वावच्छिन्नप्रतियोगिताकभेदाभावस्य सत्त्वात्सोयमिति प्र- राम
तीत्यव्यक्त्यभेदस्यैव तत्र विषयत्वावश्यकत्वाच्च · व्यक्त्यंशे भेदस्यापि भासमानस्य विनाबाधकं त्यागायोगायोगाच्च · न चोत्पन्नत्वप्रतीति ५

रेवबाधिको · प्राग्यत्वेस्मृतिसत्वरूपायाउत्पन्नेर्वर्णेष्वनुभवविरुद्धत्वात् · अतएववर्णमुच्चारयतीतिप्रत्ययोनतुस्मारयतीति · उच्चारितत्वं
चनोत्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वं · किंचाभिव्यंजकनिष्ठोत्पत्त्यादिः परंपरासंबंधेनवर्णनिष्ठत्वेनप्रतीतेः तादृशसंबंधेनैवव
र्णनिष्ठत्वाभ्युपगमाच्चनभ्रमत्वं · साक्षात्संबंधेशेलाघवाद्भ्रमत्वंकल्प्यते · अतएवनीलपीतादिशब्देषुगुणपरेषुपरंपरासंबंधेन
जातेरेवप्रवृत्तिनिमित्तत्वमिसंगीचक्रुः · नचगकारहकारयोरैक्यप्रतीत्यापत्तिः भिन्नप्रतीत्यनापत्तिरितिवाच्यं · व्यंजकविशिष्टयोर्भि
न्नत्वेनदोषाभावात् · व्यवहारदशायामौपाधिकभेदस्यांगीकारात् · विशेष्यांशमात्रेयाभेदइष्टएव · ननुस्त्रीप्रभवोयंशुकप्रभवोय
मितिप्रतीतिस्तच्छब्दगतान्तरंतुमानंचरस्यादितिचेन्न · स्त्रीशुकादिजन्यतावच्छेदकताल्वोष्ठसंयोगेतदभिघातजवायोर्वातत्संयो
गेचाविद्यमानेवैजात्यस्यपरंपरासंबंधेनस्फोटेऽङ्गीकृतत्वेनादोषात् · तथाचप्रागनुभूतेनेदानींतनानुभूतस्याभेदसिद्धौतावत्
त्कालंस्थिरत्वेनैकंकपश्चान्नाशयिष्यतीतिन्यायेननित्यत्वेवाऽर्थमेवाखंडवाक्यस्फोटः कः पदार्थोभावितिचेद्भावःक्लृप्तंभवतीति
चेत् · त्वत्सम्मतक्षितिषुद्रव्यादिषुभांतर्भूतत्वेतावतावतामप्रमाणसिद्धप्रत्यायकमात्रतुशक्यतेऽनियतपदार्थवादेगौरवमितिचेत् · व्यक्तौ
यतातवापिनास्ति · उपाधीयतातुसर्वैः सुवचानित्यत्वानित्यत्वादिनाविभजनात् विभाजकोपाधयस्तुघटविभाजकोपाधिवत्तावश्य

शा॰ बृ॰
6

काःयथघण्णन्तंता एव वर्णा नित्या ह्रस्वत्वदीर्घत्वादिकं तु वर्णानिष्ठमेवेत्यतो भिन्नएव मित्यादिभिदीर्घादिषु एव सादिकं न अभ्यासार्थं दृतानुवृत्तिः
प्रयोगार्थे तु मध्यमा॰ शिष्याणामुपदेशार्थं दृतं निरिष्टा विलंबिते तिवृत्तित्रयसत्वे नान्यतमवृत्तौ तत्परकरणे कृते पि दृतं तरीए सादिकं भवत्ये
व॰ तेषां ध्वनिनिष्ठत्वाणीकारादिति तत्परसूत्रे भाष्ये उक्तं कूटस्थे रविचालि वर्णे भवितव्यं इति च तत्र तत्रोक्तं तथापि लाघवात्॰ पश्यश
यां येनोच्चारितैनेत्येकवचननिर्देशाच्चात्रैव तात्पर्यं इति कल्प्यते॰ प्रक्रियादशायां परमस्यानाश्रयणं॰ केचित्तु अनंतवर्णागीकारेपिए
कं पदमेकवाक्यमिति प्रतीत्या वर्णाभिव्यंग्यः स्फोटः॰ न चैकत्वप्रतीतिरौपाधिकी॰ घटे पि तथात्वापत्त्या व्यभिध्यायते॰ जातिस्फोट
वादिनस्तु इत्थमाहुः॰ वायुसंयोगादीविव कत्वादिकमस्ति॰ यद्भावणास्थलेध्वनिरपि अवश्यमभ्युपगंतव्यः॰ न च तदुत्पादकशंश्वाघ
भावेन तदसंभव इति वाच्यं॰ दूरतः वर्णाग्रहणे ध्वनिग्रहणस्यानुभवसिद्धत्वात्॰ वर्णोच्चारणास्थले तत्र तत्स्थानस्य जिह्वया ईषदत्रणा
ते वर्णानुपलब्धेश्च दर्शनाज्जिह्वाभिघातजवायुकंवसंयोगादिध्वनिजनकत्वकल्पनात्॰ तस्य वर्णोपसन्निस्थले सत्वात्तैवमप्रतिबध्य
प्रतिबंधकभावकल्पनास्यादितिविपरीतं गौरवं॰ एवं च तेषामेव कत्वाद्यधिकरणतया वर्णत्वसिद्धौ कृतं तदन्तिरिक्तस्फोटेन सोयं गकार
इति प्रतीतिस्तु सोयं दीप इत्यादाविव साहश्यान्नत्वाध्यवसायेन बोध्या॰ एवमप्यनेकेषां वर्णानां न शक्तत्वं किंतु आकृस धिकरणन्यायेन

एम॰

शक्तत्वमिव शक्तत्वमपि ज्ञायते रेखामात्रज्ञातिरभ्यवहितोत्तरत्वसंबंधेन घत्वविशिष्टटत्वं पद्यादृश्यं घटपदमिति प्रतीत्या घटपदज्ञानत्वेन का
रणत्वे कारणतावच्छेदककोटिप्रविष्टतया चानेकवर्णनिष्ठजातिविशेषस्यावश्यकः न च वर्णानुपूर्व्यैव प्रतीतिकारणत्वयोर्निर्वाहे घटत्वा
देरपि संयोगविशेषविशिष्टमूर्देशान्यथासिद्ध्यापत्तेः वस्तुतो जातिस्फुटतस्फुजातिस्तदवच्छिन्नं चैतस्यैव ब्रह्मरूपमेव तस्य चोपाधिकभेदात्सारो
र मद्रूपारोपप्रतीति वैलक्षण्यं यद्यपि स्फोटानिर्वहादेशः स्फोटेनेतरमः यथा सूक्ष्मत्वमर्थवद्धातुस्वरूपमित्यादिसूत्रेषु पस्पशाह्निकभाष्ये
हारान्हिकयोश्च भाष्ये कैयटादौ वर्णस्फोटादिपक्षादृश्यन्ते तथापि जातिस्फोट एव तात्पर्यमिति स्पष्टं पितामहचरणाकृतवैयाकरणभ
तो ग्रन्थनाशे · प्रकृतमनुसरामः · अशादिपदइति आनिष्टतइत्यादौ · वार्तिकमते आगमाभावमभ्युपगम्योक्तं · त्रयोरिति · एङ्ह्रस्वादिसूत्र
भाष्ये गुणाभावोपि दृश्यते · संभवाच्चेति · प्रत्याख्यानाभावे पदद्वयवत्पदत्रयमप्युक्तार्थबोधकमस्त्विति भावः · न ह्येकार्थस्यैकमेव बो
धकमिति नियमोस्ति · नन्वेवमर्थवत्त्वस्यासामर्थ्यात्समासस्यार्थलाभ इत्यर्थपरभाष्यविरोध इति वाच्यं स्वरितत्वप्रतिज्ञासामर्थ्येन वर्ण
नपरतया भाष्यस्य सुयोज्यत्वात् · पूर्वसूत्रे चारितार्थ्यं वदतस्तस्याप्युक्तरीत्यावश्यकत्वाच्च · दृगिति · दृगर्थस्तु अधातुरित्यत्र पदइति पर्
युदासः उत्तमसज्यप्रतिषेधो नाघपर्युदासेनार्थवत्त्वलाभ इत्यर्थापेक्षया न जिवयुक्तन्यायानिमित्त्वेनार्थवत्सदेनैवार्थवत्त्वलाभ इत्यर्थ

शा. दृ.
७
7

विशेषाभावात्. नांत्यः वाक्यभेदेन समर्थसमासकल्पने मानाभावात्. न च कार्यैति. यत्तु यथोद्देशपक्षेपि प्रत्ययांतत्वस्याभ्यनित्वेनोपन्ना
निष्ठमालोप्यपवाद इति न्यायेनाकृतव्यूहपरिभाषया च संज्ञायाः अभावस्योपपादयितुं शक्यत्वेन कार्यकालपक्ष इति विशेषणावैय्य
र्थ्यमिति चाहुः. तन्न एवं फलाभावेन संज्ञायाः अप्रवृत्तावीदृशे विषये कार्यकालपक्षस्यैव युक्तत्वात्. ध्वनितश्चायमर्थः प्राग्भसंज्ञाप्र
करणे भाष्येन च सुबुत्पत्तिः संख्याकारकादेरनन्वयात्. हनादीनां धातुप्रत्यये कार्यविधानेन तेषां धात्वाच्च. प्रत्ययः परश्चेति सूत्राव्यवहित
परत्वबोधनात्तच्च. न चांतरंगत्वादुत्सर्गतः कृते क्वचन नस्य लोपसंभवे नमोक्तदोष इति वाच्यम्. एवमपि प्रयोजनानुक्तेः. न च सुबंतनि
मित्तपदत्वमाश्रित्य नलोपः प्रयोजनं. तस्य सर्वत्राप्रसक्तेरहनः. सिच अनुदात्तोपदेशादिस्यादीनां वैयर्थ्यापत्तेः. तिङंतनिष्ठपदत्वं निमित्ती
कृत्य प्रवृत्तिः सुब्वाचित्का. पर्युदासोऽस्त्विति. अप्रत्यय इति पर्युदासेन प्रत्ययांतं भिन्नं प्रत्ययात् सदृशं वा उच्यते तत्र प्रत्ययांतभि
न्नत्वेन प्रत्ययांतसदृशत्वेन वा बोधः. यद्वा. यावन्तः प्रत्ययांतभिन्नास्तेषां तेन तेन रूपेणोपस्थितिः. अत एव प्रत्ययांते विधिनिषे
धयोर्न व्यापारः. स्पष्टं चेदं सुडनपुंसकस्येत्यादौ भाष्यादिग्रंथे. तथा चाहन्नित्यत्र लोपश्छानिवभावेन प्रत्ययत्वादर्थसमाजत्यत्प्र शम
त्ययांतत्वेन प्रातिपदिकत्वं न भविष्यतीति भावः. ज्ञापितत्वादिति. प्रत्ययलक्षणसूत्रं नियमार्थमिति भाष्यकारायनिष्कर्षत् ७

लोपरूपादेशेन लोपे कर्तव्ये षष्ठ्या निवृत्तावेवोक्तपर्युदासाप्रवृत्तिर्ज्ञाप्यते। ज्ञापकस्य विशेषापेक्षत्वादिति बोध्यम्। ननु लुकं तत्वात्प्र
वृत्तिः। अप्रत्यय इत्यस्यानुवृत्तेः। ध्वनितं चेदं भाष्ये। यत्तु मुख्योपनिषत्तिप्रत्ययलक्षणं नेत्यस्मिन्नर्थे मानं विशेषापेक्षत्वात्। एवं चा
हन्निरित्यत्र तिङ्लोपनिमित्तप्रत्ययलक्षणाप्रसक्तौ तस्येति निषेधकर्तव्ये द्वोरित्वनाधातुपर्युदासेन कार्यमिति। तत्रोक्तरीत्या ए
कवचनोत्पत्तिर्द्वोरित्वेन अहं तिभवती तिस्याद्दोनव्ध्यप्रशानेः। प्रसारितादितित्याद्यापत्तेः। किंच सत्ताद्यर्थमात्रप्रतिपादनविवक्षायां
सुबन्तप्रयोगापत्तिः। अप्रत्ययः किमिति। यत्तु अप्रत्यय इति पर्युदासादर्थवत्वेन लब्धे उत्तरार्थत्वे पि इह किं चित्रयोरिति न्यायेनार्थ
वत्संदेहे नेकार्थीभावरूपार्थवत्वस्य ग्रहणाद्धातुप्रत्ययपर्युदासेन कार्यमिति। तन्न। पर्युदासाभावे उक्तकल्पनानापत्तेः। यस्मिन् ज्ञा
पितयस्य चारितार्थ्यं तन्नज्ञापितमिति सिद्धान्तात्। उत्तरसूत्रे अन्यस्यासंभवेन कृत्तद्धितप्रत्ययार्थापेक्षयातस्यैव प्रशस्तत्वात्। कृ
त्तद्धितपदेन तदन्तस्यापि प्रतिपादयितुं शक्यत्वात्तत्कृद्ग्रहणे पि प्रकृतसूत्रे तद्ग्रहणाभावात्। पारमार्थिकार्थवत्वमात्रग्रहणेन स्यपदे
वाक्ये एवं संभवेन सूत्रस्यासंभवद्युक्तिकत्वापत्तेः। अहन्नित्यतिप्रसक्त्यादोधातुप्रत्ययरूपपदे पारमार्थिकार्थवत्वस्य संभवेन धातुप्र
त्ययपर्युदासस्यावश्यकत्वाच्च। अत एवार्थवत्सूत्रे र्थवत्वं सर्वं गस्ति तैरिति कोक्तं भे पितामहचरणाः। ह्रस्वत्वमिति। नच नपुंसकत्वाभा

बृ
शृ बृं:
८
8

वान्तदोषइतिवाच्यम्·वैयाकरणापरिभाषितलिंगस्यप्रातिपदिकतुल्यत्वेनातिदेष्टुंशक्यत्वात्·वस्तुतस्तुह्रस्वोनपुंसकेत्यस्यवाच्यत्वसं
बंधेननपुंसकेवर्त्तमानस्येत्यर्थोंगीक्रियते·तच्चकांडेइतिसमुदायस्यास्त्येव·अतस्तदंशेनातिदेशापेक्षेतिबोध्यं·कार्यकालपक्षेणेति·नन्वे
वमपिराज्ञीइतिद्विर्वचनेनतद्धितांतत्वनिमित्तासंज्ञाद्वयोरेतिवाच्यं·उत्तरत्रापिअप्रत्ययांतस्यैतत्प्रवृत्तेःस्वीकृतत्वात्·तत्रचसामर्थ्या
तद्धितभिन्नप्रत्ययस्यैवग्रहणात्·अतएवकार्यकालपक्षेराजकुमारीत्यत्रविध्यर्थंसमासग्रहणं·नचैवमप्यतिदेशेनप्रत्ययांतत्वे
पिस्वस्यप्रत्ययांतभिन्नत्वानपायेनप्रातिपदिकत्वंदुर्वारमितिवाच्यं·आदेशग्रहणसामर्थ्येनातिदि[redacted]श्यमानविरुद्धकार्यकारित्वा
भावस्यैवंसिद्धांतितत्वात्·सामान्येति·तेनप्रातिपदिककार्यमात्रस्याभावः·नचतिङं·तव्याद्यत्याचरितार्थं·तस्यलिंगाप्रतिपादक
त्वात्·अतएववाराणसीइत्यादौनदोषः·नचद्विकपक्षेलिंगस्यप्रत्ययेनैवप्रतिपादनाद्दोषोदुरुद्धरएवेतिवाच्यं·लक्ष्यानुरोधेनात्रद्विकप
क्षानंगीकारात्·श्रीइतिदीर्घोच्चारणसामर्थ्येनवारणाच्च·प्रातिपदिकमित्यनुवृत्त्यासिद्धेःसामर्थ्यस्यस्तुकचत्वाच्च·प्रत्ययग्रहणाद
ति·अयंचार्थोगमंहासनेयस्मात्प्रत्ययविधिस्तदादिप्रत्ययइतियोगविभागाल्लभ्यते·परिभाषेयंप्रत्ययेग्रहणमेवंयस्मात्तस्यविधि
स्तदादिग्रहणंतदित्यर्थः·एतेनयस्मात्प्रत्ययविधिरितिसूत्रेविधिग्रहणंनकार्यं·नचस्त्रीइयतीइत्यादावतिव्याप्तिः·वतुपःस्त्रीशब्दाद्विधा

एम्
८

नै

नेपिमोऽविधानेन विभिन्नग्रहणेऽकृते पि दोषानुद्धारात् पश्यतिलोपस्यासिद्धत्वेनयङोऽप्राप्तेर्दोषाभावाच्च तत्र [illegible] दिग्रहणमपि शक्यमक
र्तुं नच नवामीत्यादौ दीर्घो न स्यादिति वाच्यं अतो दीर्घो यञीति सूत्रस्यारंभसामर्थ्यादेव प्रवृत्तेः प्रत्ययद्[illegible] त्यपि व्यर्थे प्रकृतिमात्रस्या
पि व्यपदेशिवद्भावेन तदादित्वेनांगसंज्ञासिद्धेः यस्मात्प्रत्ययविधिस्तेनैव तस्य निमित्तत्वलाभाच्चेति परास्तं परिभाषायां ग्रहणनामा
वश्यकत्वात् इकारशब्दवृद्धिवचनेऽर्दस्याकारैके परत एकादेशस्य परादिवद्भावेन प्रत्ययत्वादंगत्वे स्त्रीशब्दस्येयङापत्तेश्च उत्तरहलेश्चा
घेकाररहितपाठे तु पतीतिरूपमिष्टः शत्रास्त्रियांबाध्यं अतएव भवतीसादावतो दीर्घो यञीति दीर्घो न पृयवपगतो आप्यांपद्दू लु
कियायामिवावामीत्यादावतो दीर्घो यञीति सूत्रं च एतार्थप्रत्यासत्तिन्याये नैकस्यैव प्रत्ययस्य ग्रहणेनादोषो नयुक्तः एतेन प्रत्यय
इत्यपि व्यर्थमित्यपास्तं किंच प्रत्यय[illegible]ति मत्त म्यंगाभावेऽङ्गसंज्ञायां प्रसत्यातेनतो व्याधिकेपि प्रवृत्तत्वेन प्रत्ययस्य निमित्तत्वाभावे
नांगेन प्रसयाक्षेपानापत्तेश्च वत्याघमित्यिध्यायत्तेः देवदत्त आट् नमयाक्षीदित्यादौ देवदत्तादिशब्दात्पूर्वमडाद्यापत्तेश्च एतेन प्रत्या सप्त
लुङादिनिमित्तांगत्वस्याग्रहणेन दोषाभावात्प्रत्यय इति सूत्रस्पष्टं तं सुत्यजमित्यपास्तं अंगसंज्ञायां [illegible] प्रत्ययनिमित्तत्वाभावे नतन्नि
हृपितांगत्वस्याप्रसिद्धत्वात् एतेन प्रत्ययविशिष्टस्य तन्तो व्याधिकस्य वामाभूत् इति मूलग्रंथो व्याख्यातः तदंतत्वं तु प्रत्ययाक्षिप्तस्य

श॰वृ॰
९
7

धातुप्रातिपदिकाद्यवयवकसमुदायस्यप्रत्ययेनविशेषणाद्येनविधि॥तिसूत्रेणालभ्यते॰ अतथात्वादिति॰ यस्माद्धि हितत्वंतदादित्वाभा
वादित्यर्थः॰ नहीदव्यपदेशिवद्भावेनलब्धुंशक्यं॰ एतेनोक्तन्यायस्याधिकग्रहणाभावेएवतात्पर्यमुक्तं नतुव्यपदेशिवद्भावबाधेमाना
भावात्प्रयुक्तत्वाच्चेति निरस्तंतच्चनयन्नाह॰ अन्यथेति॰ संज्ञाविधौतदंताभावेपि यस्माद्धि हितइत्यंशोस्त्येवेतिभावः॰ दिगिति॰ दिगार्थस्त
घटोक्तिःहयुवतेरत्यस्यतद्धितांतत्वेनप्रातिपदिकसंज्ञादुर्वारा॰ किंचबहुच्पूर्वमितिन्यायेनलाघवाभावः॰ अर्थवत्सदृशात्तदार्थमावश्य
कत्वात्॰ अपिचबहुपटवस्तिष्ठंतीतिवाक्यस्यसंज्ञादुर्वाणासमुदायस्यबहुच्पूर्वत्वात्॰ अतएवप्रत्ययांतत्वमुबंतत्वतिङंतत्वादिव्यव
हाराणामतिप्रसंगावारणार्थंप्रत्ययग्रहणेयोयस्मात्सविहितस्तदादेस्तदंतस्यग्रहणमितिवचनमारभ्यंते॰ नसूत्रत्वादृशंवचनमस्ति॰ यदि
तदहानेनहोपवारणंतुसुतरांगौरवमिसलं॰ ननुभाषाशब्दानामपिबोधकतास्वपायाः॰ शंके॰ सत्वात्प्रातिपदिकत्वंस्यादितिचेन्न॰ तन्निमि
त्तकार्येकृतवर्णानांन्यूनाधिकभावेभाषात्वभंगापत्तेः साध्वनुशासनाच्च॰ कृदंतेविधिरियमिति॰ पूर्वसूत्रेपर्युदासस्यप्रसत्वेनधातुप्रत्य
यांतेविधिनिषेधयोरभावात्कृद्ग्रहणमविशेषादुभयत्रापिप्रवर्ततेइतिभावः॰ प्रसज्यप्रतिषेधेतुप्रवेशोपवादन्यायेनानंतरस्येतिन्यायेन
चप्रत्ययांतस्येतिनिषेधबाधेनचारितार्थ्येननिषेधाद्बलीयान्भवंतीतिन्यायेनअधातुनिषेधएवकृद्ग्रहणस्यबाधकःस्यात्॰ निषिद्ध

लघी
९

इति॰ एतदर्थे प्रतिपादकं स्त्रीप्रत्यये चानुपसर्जनेनेति वचनमेव स्पष्टः॰ संप्रसारणमिति सूत्रे भाष्यकृता यदुक्तं॰ किन्तु अंगसंज्ञा विभ
क्तसूत्रेनेपटु॰ वटू॰ स्थानावस्त्री सत्ता अस्त्रीत्यनुवर्त्तेशब्दाधिकारात् अयरोनार्थपरत्वं संपाद्य गौणमुख्यन्यायेन स्वाख्यादित्यनुवर्त्यैवा
प्रधानस्यैव ग्रहणादुक्तार्थलाभ इत्याहुः॰ एतेन कृद्ग्रहणे इति परिभाषायाः कृत्सामान्यग्रहणे कृद्विशेषग्रहणे वा यथा प्रवृत्तिस्तथा
स्त्रीप्रत्ययसामान्यग्रहणे स्त्रीप्रत्ययविशेषग्रहणे वास्याः प्रवृत्तिः॰ एवं च शार्ङ्गरवाद्युक्तेति मदोक्तमपास्तमगतिरन्तरेति सूत्रे कृद्ग्र
हणादिति परिभाषाया उत्पन्नत्वेन धर्मिग्राहकमानवत्वादुक्तार्थलाभेपि स्त्रीप्रत्यय इति वचनस्य संकोचकल्पने मानाभावात् तः तद्धि
ताधिकारे प्रतिप्रत्ययपाठस्यैव पर्याप्तत्वेन च महिकुयुवतिप्रत्याहारा तिपदिकत्वे सिद्धेपि तद्धितान्तत्वेन प्रातिपदिकत्वलाभार्थे॰
तेन पि सिद्धे तदन्तस्य पुनः प्रवृत्त्या पूर्वपदप्रकृतिस्वरबाधनं॰ इदं च तदादिनियमाभावे एव संगच्छते॰ एतेन लिंगविशिष्टपरिभा
षया सिद्धे तद्धिताधिकार उत्तरार्थं इति हरदत्ताद्युक्तमपास्तं॰ सति प्रयोजने आचार्यस्याज्ञानकल्पनस्यायुक्तत्वादित्याहुः॰ मुलभत्वादि
ति॰ यत्तु स्त्रीप्रत्यये चानुपसर्जने इति वचनस्य प्रवृत्त्यंगीकारे ऽकृतव्यूहपरिभाषया एवं समपि संज्ञानापत्तिः किं च एवं प्रवृत्तायाः संज्ञा
याः एकदेशविकृतन्यायेन सत्वेपि कार्यकालपक्षे दोषो दुरुद्धर एव॰ सुप्तिङि एकवाक्यतापन्नसंज्ञायाः प्रत्ययान्तत्वेनाप्रवृत्तेरिति तन्त्रे॰ प्र

श॰ वृ॰ वेसुपविशिष्टस्य संज्ञाया। क्रियमाणत्वेन तादृशसमुदायेप्रसक्त्यांतत्वस्य कालत्रयेप्यभावात्तद्रूपपरिभाषायाः अप्रवृत्तेः लक्ष्यानुरोधेन।
१० त्रपथोद्देशपक्षस्यैवांगीकारात्। कृत्तद्धितसमासेत्रेअप्रसक्त्यांतपदस्यानुवर्त्तनाच्च। अपिच। एकदेशविकृतन्यायः षष्ठीनिवर्त्तमानत्वस्यैवार्थः
10 षष्ठीनिवर्त्तमानत्वे तत्प्राधान्यात्कार्यातिदेश एव। प्रातिपदिकसंज्ञापि शास्त्रीयं कार्यमेव। कार्यकालपक्षस्तु कार्यप्रवृत्तिसमयेपि कार्यविधा
यकैकवाक्यतापन्नस्य संज्ञाविधायकस्य प्रवृत्तिरित्येव। सा चोपदेशेनैवसूत्रसंकोचेन किंचिन्मानं अतिदेशवाक्यस्यापि एकवाक्यता
याः सुवचत्वात्। किंच। कर्मिंचरातिबुद्धिकर्त्तृषु। सितत्तमसित्यादीनामनेनानेकेषांक्रमेण। द्वितीयेत्याश्रिमरकवाक्यतायां दृष्टत्वात्।
एवं चैकदेशविकृतन्यायेन संज्ञाप्रवृत्तावपि कार्यकालपक्षेदोषाद्दुरुद्धर एवेति तत्रतत्राकरग्रंथाः परास्ता इत्याहुः। तच्चिंत्यं। अतिदेशे।
नहि पूर्वसंज्ञायाः आरोपमात्रं सा च संज्ञासु लुकविध्येकवाक्यतापन्ना। तस्या आरोपेपि सुप्रद्दुर्लभ इत्याहुः। यदपि छिन्नकुमारीश
हेनप्रशब्देन गतिकारकोपपदेतिवचनात्सुबुत्पत्तेः प्रागेव समासेप्रसक्त्यांतत्वात्पूर्वसंज्ञाप्रवृत्तिरिति। तन्न। उपसर्जनस्त्रीप्रत्ययेतदादि
नियमात्। ह्रस्वग्रहणादिति परिभाषया च दंतत्वेन सिद्धेस्सुपः लुकः प्राप्तिः। लुकः शब्देन चात्र तत्प्रयोजकीभूताः समासादय उच्यंते। अंत एम
रंगानपीतिन्यायोप्येवमेव। सुपश्चेति। नन्वकृतव्यूहपरिभाषयानुमादयो न भविष्यंति हल्ङ्यादिलोपस्तु कृते वा एव। समासात्पूर्वं लुकः १०

मास्यभावेनलोपनिमित्तविनाशाभावात्· लोपेसमासेचनद्धिषयेलुकोप्रवृत्तत्वेनसुतरांनिमित्तविनाशाभावाच्च· अतएवाल्लोपो
नरतिसूत्रेतपरत्वाच्चरितार्थत्वकृत्न्यायस्यनास्त्येवेतिचेन्न· हल्ङ्याब्भ्यइतिसूत्रेपरस्यसाहचर्येणासुतिसीनामेकग्रहणेनसुप्स्त्वजासांक्रांते
तस्मिन्नेवप्रयोगेलुकःप्राप्तत्वेनाकृतव्यूहपरिभाषायादुर्वारत्वात्· अतएवसमर्थग्रहणंपरिभाषायांज्ञापकमितिभाष्यकारोक्तंसंगच्छ
ते· अतएवगोमत्प्रियङ्स्यादेनुमाद्येन· अतांगानपिविधीन्बहिरंगोलुग्बाधतइतिभाषाकृतव्यूहपरिभाषापेक्षयाभिन्नैवेतिकश्चि
त्· अनुवृत्तेरिति· नचकृत्तद्धितयोरविशेषणं· संकोचेमानाभावात्· इद्दसमासानापत्तिश्च· नद्यन्यतमस्यांडित्स्येववर्त्तपञ्चदत्तवि
सुमित्राःपंडिताइतिप्रयुज्यते· साहित्यविशिष्टैकपदोपस्थाप्यत्वाविशेषणामवेत्रान्वयस्योचितत्वात्इतिवक्ष्यते· अतएवपूर्वशा
लाप्रियःपूर्वघटप्रियइत्यादौद्वंद्वतत्पुरुषयोःउत्तरपदेइतिवचनेनावांतरतत्पुरुषप्राप्तिपरिकल्पनं· एकपदेपरत्रैपवाऽर्थवत्त्वेपिपरद्व
येऽर्थवत्त्वकल्पनेमानाभावात्· साहचर्येणाप्रशस्तार्थवत्त्वस्यैवग्रहणाच्च· नचैवमर्थवद्ग्रहणानुवृत्तेःसामर्थ्यात्प्रशस्तायांमत्
वितिपूर्वोक्तंविरुध्येत· उपरंजकतायथाश्रुतार्थप्रतिपादकेनापिकृत्तद्धितयोरन्वयसंभवादितिवाच्यं· कृत्तद्धितौसमासश्चेतिभि
न्नसूत्रद्वयकरणेऽप्येकसूत्रकरणेननोपरंजकतयाविशेषणान्वयाभावस्यबोधनात्· असमर्थेति· तत्त्वंचपरस्परमनन्वयात्· नचपा

श॰ इ॰ ष्टिकान्वयोस्तीतिवाच्यं॰ तस्योपपदादपि तुमशक्यत्वात्॰ साकांक्षितविषयकस्य तस्य सर्वत्र कल्पने मानाभावात्॰ फलाभावात्॰ गौरवाच्च॰
११ नचैकक्रियान्वयित्वमेव सामर्थ्यं॰ असमर्थसमासोच्छेदापत्तेः कुतः सर्वस्मिन्नित्यादौ घटो न भवतीत्यादौ समासापत्तेश्च नच सत्यपि तत्र तत्
॥ त्कर्मकक्रियालक्षितत्वेनान्वयोस्तीति वाच्यं॰ चकारादेरिव दृशेरपि प्रयोगानापत्तेः॰ धर्मिग्राहकेति॰ समर्थः पदविधिरिति परिभाषया
समासस्याप्राप्तत्वेन तद्दृशेर्ज्ञापकस्यावश्यकत्वे मुकुल्यन्तावयितद्दृवज्ञापकमाश्रयणीयं॰ अत एव शब्दे उपपदे दृश इति॰ नचास्येलला
दयोरित्यादौ सुपीत्यधिकारात्तत्सिद्धिरिति वाच्यं॰ असंभवेन तदसंबंधात्॰ अन्यतः तत्प्रवृत्तिनिमित्तमपि प्रत्ययविधायकेनैवाभिधीय
ते अत एव प्रकृत्येकदेशस्य सुबन्वयः॰ एतेन द्वितीयान्तस्योपपदत्वमिति विदन्तः परास्ताः॰ नहि द्वितीयान्तं समस्यानिर्दिष्टं॰ येनोपपदसं
ज्ञां लभेत॰ अन्वर्थसंज्ञाबलादधिकारसामर्थ्यात्तत्प्रकृतिकसमुदायस्य सुबन्तत्वं॰ एतेनासत्यपि दिशिग्रहणात्तत्प्रकृतिकसुबन्ते लक्षणायाः
सत्वात्तद्दृतस्योपपदत्वमित्यपास्तं॰ लक्षणायां मानाभावात्॰ अनुवृत्तसुपीति पदे एकलाघवात्सुप्प्रकृतौ लक्षणाया युक्तत्वात् कर्मण्य
णित्यादौ तदभावेनैकस्यैवान्वाय्यत्वाच्च॰ एतेन स्तंबेरम इत्यत्राधिकरणत्वात्सप्तमी कारकत्वात्प्रकृतिस्वस्थेति कारक इति सत्त्व॰ राम
स्थाकरस्येत्याख्यानाः नचैकादेशस्य पूर्वान्तत्वेनोपपदत्वादेव सिद्धिरिति वाच्यं॰ कार्यकालपक्षे दोषस्योद्धृतत्वात्॰ अन्वर्थसंज्ञायाः ११

सत्वेन सुपोपि वाच्यकोटौ प्रवेशेनोभयत्रात्र अपरोक्षं तादृशत्वाभावात् · किंच सप्तमीस्थत्वम शास्त्रीयमकल्पं ततो निष्कृष्टं पूर्वोक्तत्वेन
लब्धुमशक्यं · अत एव सम्बन्धत्वं पूर्वोक्तत्वेनोपपदसंज्ञा तत्सप्तम्येकदेशे नैवेति निरस्तं · यत्तु पंचकं प्रातिपदिकार्थपक्षे प्रातिपदिकमात्रोपपदं
आगादिष्वाप्तस्यार्थं महाज्ञाकरणमिति तत्र कर्मादिद्योतकविभक्तिसमभिव्याहारे प्रातिपदिकेन तस्य वक्तुमशक्यत्वात् समीपवाच्युप
शब्देनोपादानाद्व्यवहिते पि सम्भवान्न दिव्यादावुपपदत्वमस्त्येव · पाठक्रमादर्थक्रमस्य बलवत्त्वेन क्रियायाम प्रयाम्न्वयाद्व्यवहितत्वं अस्त्ये
व · सप्तके नोपदशामित्यादौ समर्थेषु प्राभोषायाः प्रवृत्तत्वान्न दोषः · लकारविधौ तु समर्थे परिभाषाया न प्रवृत्तिरित्यग्रे निरूपयिष्यामः ·
कुंभकार इत्यादीनामलौकिकविग्रहेषु ष्ठ्या एव प्रवेशः · कृत्सु कृत्यर्थे प्रति कर्मत्वात् अत एवाक्रोश विवक्षायां षष्ठ्या आक्रोशार्थस्य लुकि
कुंभस्यकार इत्यत्र सेव · ध्वनितं चेदमुपपदमतिङिति सूत्रभाष्ये उपपदमतिङिति सूत्रे उपपदशब्देनोपपदमर्थकृतिकं सुबंतमुपपदं
वा सुबंतान्तरस्य तत्र इति वक्ष्यामः · नन्वेवमपि शशशृंगादि समानानिरर्थकानां प्रातिपदिकसंज्ञार्थं समासग्रहणमावश्यकमिति · अ
त्रोच्यते · अनिर्वचनीयख्यातिवादिनामरणात्तत्र अनिर्वचनीयशृंगादिकमस्त्येव · यद्वा शशशृंगादिशब्दानां विशकलितप्रसिद्धशशशृंगा
दिकमारोपितसंबंधशक्यं · गवादिष्वनुभूतं विषाणं शशमस्तकवर्तितया बुद्ध्या लक्ष्यते स्येवाभिधानाय शशविषाणादिशब्दानां प्र

श॰वृ॰
१२
12

योगात्। अतः एवंस्त्रैणोव सिद्धिः। पदिवास्तवसंबंधेन बहिः सत्तमर्थे शब्दा अभिदधीरन्। तर्हि घटो स्तिघटो नास्तीति च प्रयोगो न स्यात्। यदा
र्थसत्वे पौनरुक्त्यात्। तदभावे बाधनात्। अत एवास्य सूत्रस्य शाटकं वयेत्यादि संगच्छते। कमलवनोद्घाटनं कुर्वते इत्यादौ कर्तृगामि त्वविव
वक्षायामात्मनेपदमित्याद्याकरग्रंथानामयमेवाशयः। अस्मिन्नर्थे तदाद्यान्विष्याप्याप्यासमिति सूत्रप्रयोगोऽपि मानं। किंचार्थवत्त्वं बोधकत्वं
तत्त्वं शशशृंगादावसत्त्वात्। अत एवाक्षौहिणीरथन्तरादिशब्दावप्यवानां प्रातिपदिकत्वं। अत एवेदृशविषये समयासादिविधायकशास्त्रा
णां प्रवृत्तिः। अत एव प्रातिपदिकमिति महासंज्ञाकरणं च सतार्थबोधकशब्दमात्रेऽपीयं संज्ञेति हितदर्थः। एतेन वेदेऽपि महासंज्ञाव्यवहारः। कि
मर्थं कृत इति प्रश्नः प्रकृतैवोत्तरमिति महोक्तमपास्तं। वेदाक्षराणामध्ययनादावदृष्टोत्पत्त्यर्थमावश्यकत्वाच्च। शाब्दबोधेन बाधज्ञानं प्रति
बंधकं। नापि अयोग्यतानिश्चयः प्रतिबंधकः। नापि योग्यतानिश्चयः कारणं। अत एव मिथ्याभिशापगालिदानरूपकादिकाव्यजन्यबोधा
नुभवः। व्युत्पन्नं प्रति शब्दो न मूकः। तत्तदर्थे प्रवृत्तिश्च। एतेन एषवंध्यासुतो यातीत्यादौ पदार्थोपस्थितिमात्रं न शाब्दबोध इति नैयायि
काद्युक्तमपास्तं। सुखाद्युत्पत्तौ प्रवृत्तौ चैव विशिष्टज्ञानस्यैव हेतुत्वात्। सर्वत्रैव तथात्वापत्तेः शाब्दप्रामाण्योच्छेदापत्तेश्च। शाब्दयामीसत्त्वम
विरोधापत्तेश्च। वह्निना सिंचतीत्यत्र प्रवृत्तिः परं नायाद्या। प्राक्तनबाधिना प्रामाण्यशंकाया एव जायमानज्ञाने जननात् छूत्यज्ञानस्यैव रामे

१२

प्रवृत्तावुपयोगिनोऽसमत्वात्। एतेन नैनं छिन्दंति शस्त्राणीति नैनं दहति पावक इति तच्चैनं क्लेदयंत्यापो न शोषयति मारुत इति व्याख्यातं। श
शष्पं गादिपदेषु पदप्रकारक एव बोधाच्छाब्दबोधविशेष्यत्वापि विशेषणत्वं तथाप्यानंगीकारात्। तत्र इदं पदं क्लृप्तिच्छक्तं साधुपदत्वादित्याकारस्तद्
होहेतुः स च शक्यानुपस्थितावपि भवतीत्यन्यत्र विस्तरः। उक्तं स्तु प्रत्ययो नेति। एवं भाग प्रकृतिक प्रत्ययाभावोऽत्र विवक्षितः। तेन राजाद
यानित्यत्र प्रातिपदिकत्वं न। एवं भागः परमिति। पदस्याबून चात्रोत्तरभागो हेश्यक भिन्नोत्तरखंडार्थान्वयी गृह्यते तेन गविस्त्ययं प्राहेत्यादे
गोहत्यादीनां मुखं तत्त्वाभावेपि न समुदायस्य प्रातिपदिकत्वं। नास्ति करत्यत्र तु निपातसमुदायात् प्रत्यय इति पक्षे नश्चात्रस्य एवं खंडे क्रिय
माणे दृष्टस्य प्राप्तत्वेपि प्रकृतिरूपपदद्वयस्यापि एवं भागः प्रत्ययमात्रस्य चोत्तरभागत्वसाकारक खंडद्वयस्यापि कर्तृशक्तत्वेन नियमप्र
प्रवृत्तिः। अत एव वृषणवसुः वृषणाश्व इत्यत्र समासे वृषण्वस्वश्वयोरित्येनेन भत्वात् सर्वसमासे पूर्वभागस्य पदत्वाभावेनेदृशार्थस्य
दुर्लभत्वादित्यपास्तं। गृहषाविसोढरीति उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणनिषेधेन भाष्ये सर्वनामस्थाने परेचेति पदत्वमा
त्रस्यनिषेधनजहत्स्वार्थापाद्यावानर्थक्याच्च दोषशंकेति भावः। परलके नो पदं शास्तिति। ननु प्रत्ययात्प्रकृत्यर्थप्रतियत्कारकं तस्यैव
क्लृप्तगावाइतिपरिभाषायांग्रहणा मलकेनेत्यसकरणात्तेन भुक्ते इत्यत्र शात्वान्नयरतिचेत् सत्यं उपदेशस्तत्तीयापामितिसूत्रस्थतरतीया

ग्रहणसामर्थ्यात्समुलादिवत्समासाभावात् प्रवृत्तिनिमित्ताशयस्यसत्वात्· आदिनादन्तेनोपदंशं भुङ्क्ते इत्यादि बोध्यं· अत्र तु शाब्द उपदंशनक्रिया
पाकरणत्वं स्पष्टमेव वस्तुतस्तु उपदंशस्तृतीयायामित्यादिप्रमाणात्कर्मणि तृतीयेयमित्याहुः वाक्यस्यैवेति· तथा च प्रातिपदिकसंज्ञा
यां सुपो धातुप्रातिपदिकयोरिति लुक्प्रसज्येत· न च समासविकल्पसामर्थ्यान्नेति वाच्यं· व्यवहितविपरीतप्रयोगसंपादनेन चारितार्थ्यात्· किं च प्रातिप
दिकत्वे शकारादाकारस्योदात्तत्वे पिगतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वं स्यादिति निरुक्तशब्दाकारस्योदात्तत्वस्य पक्षेऽभावसंपा
दनेन समासविकल्पस्य चारितार्थ्यात्· इत्युपदंशादेन समासइति निषेधस्य पक्षेऽप्रवृत्त्यर्थं तस्यावश्यकत्वाच्च· स्पष्टं चेदं उपयोगा
दाख्यायामिति सूत्रे भाष्यकैयटयोः· न चैवं पदमात्रस्य प्रयोगाभावेन सुब्विधेः सुप्निमित्तकार्याणां चैवैयर्थ्यमिति वाच्यं· पाहि मे गंगे
अक्लिसर्गे गंगाद्इत्यादिवाक्ये सुस्त्रीप्रसंगेये न दादिनियमस्य निषिद्धत्वादर्थवत्सूत्राप्रवृत्तौ कृत्तद्धितान्तत्वाभावेनोत्तरसूत्राप्रवृत्तौ च प्रातिप
दिकत्वाभावेन स्त्रौकान्मुक्तिरित्याद्यर्थं· बहिर्भूतनिमित्तलुकोप्यलुकाबाधस्यैव श्रूयमाणत्वेन च लुकः प्राप्तेसार्थकस्य स्पष्टत्वात्·
वाक्याद्येस्य कुत्साद्यर्थविवक्षायां सुस्मर्गत एकवचनोत्पत्तौ कप्रसङ्गापत्तिः· किं च पचते देवदत्त इत्यादौ एकारादीनां सावकाशत्वे
न स्वेदस्तः पचतेइत्यादौ वाक्यस्य प्रातिपदिकत्वे ह्रस्वापत्तिरित्यलम्· समासग्रहणाति· यत्तु पर्युदासेनैवाव्ययवत्त्वे लब्धे अर्थवद्ग्रहणं अर्थ एमं

वानेव योऽर्थे वा निष्पैतरथेलाभार्थः । तेनार्थे वर्त्यवयवाक्यस्यनेतितन्न । तत्पुरुषार्थस्याशब्दार्थत्वात् बहुपटवद्दस्याप्रसिध्यापत्तेश्च । परत्वादिति ।
अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायेन घटोऽस्ति हेयुवतेरित्यादौ स्त्रीप्रत्ययेन टाबादिनियमस्य निषिद्धत्वेन प्राप्तत्वात् तन्निमित्तप्रातिप
दिकसंज्ञाया अपवादत्वेन बाधात् समासनियमस्य चारितार्थ्यं । विनिगमनाविरहेण सर्वोपवादत्वमिति वादिनां मतेनतु परत्वात् तत्पुरुषत्वा
दितिबोध्यं । बाधादिति । ननु नियमस्य निषेधमुखेन प्रवृत्तिरिति पक्षे लक्षणापावाक्यस्यनेत्यर्थस्य निष्पत्वेन येन नाप्राप्तिन्यायेनार्थवत्सूत्रा
पवादभूतस्य परत्वेन कृत्तद्धितापवादकत्वेनेष्टसिद्धावपि विधिमुखेन प्रवृत्तिः सामान्यशास्त्रसंकोचकतावेति पक्षे कुंभकार इति समासे कृ
द्ग्रहणस्य प्राप्तावपि येन नाप्राप्तिन्यायेनार्थवत्सूत्रसंकोचकत्वेनेपि कृत्तद्धितांतग्रहणसंकोचकत्वे मानाभावेनोक्तदोषाद्वार एवेति
चेत् । अत्राहुः । विधिमुखेन प्रवृत्तावपि संकोचस्याशेषबाधरूपत्वेन तद्बाधकस्य विप्रतिषेधसूत्रस्य प्रवृत्त्या कृद्ग्रहणसंकोचोपि सुलभ एव
येन नाप्राप्तिन्यायस्यैवानंतरस्येति न्यायस्यापि दुर्वारत्वाच्च । यद्वा लक्ष्यानुरोधेनात्र निषेधमुखेन प्रवृत्तिरस्त्येव पक्ष आश्रीयते । यत्तु समास
साहचर्याण्ण्यन्तप्रविष्टवर्णाघटिततद्धितांतस्यैव ग्रहणेन घटोऽस्ति हेयुवतेरित्यादौ दोषाभावः । कृदंतं साहचर्यान्नियतप्रयोगविषयकमेका
र्थीभावसामर्थ्ययुक्तं प्राग्घटते इति । तन्न । सुंदरयुवतिः युवतिसुंदरीत्यादितद्धितेष्वनियतप्रयोगेण साहचर्यस्य वक्तुमशक्यत्वात् । सम

श. बृं.
१४
14

र्थे परिभाषायाः पदविधित्वाभावेनाप्राप्तेः पाचक एवं धात्वर्थे स्याद्दोषः प्रातिपदिकसंज्ञा नाम यत्तेऽश्व यत्तत्त्वस्य मूलकस्योपदंशनं स्पर्शनं च कृत्वा
भुंक्ते देवदत्त इति वन्मूलकेनोपदंशं भुंक्ते स्पर्शनं च कृत्वेति प्रयोगे वारणार्थमेकार्थीभावस्य समुदाये आवश्यकत्वेनोपदंशस्तृतीया
यामित्यादौ समर्थपरिभाषाया दुर्वारत्वेन च साहचर्येण वारणाच्च । गामानयेत्यादौ अर्थवत्सूत्रस्य वारणार्थं समासनियमस्यावश्यक
त्वाच्च । एकार्थीभावेति । ऋद्धस्य राज्ञः पुरुषो भार्या यायाश्वेरत्यादौ विशिष्टस्य राजपुरुषो भार्यायां यायाश्च घटस्य रस्याय निष्ठवारणार्थं भेदसंसर्ग
योरुक्तिरावश्यिके त्यादि विवृणामः इत्यारामीति । आदिनोक्तपदद्यरित्वाक्ये पिरीषो बाध्यः । किं चैवं कृष्णह ... नचार्थवत्सूत्रस्यैव कृ
ह्णस्याप्यर्थवत्त्वाभावेनाप्राप्तिरिति वाच्यं । पाचकस्यादावप्यर्थवत्त्वाभावेन संज्ञानापत्तौ नैयायिके कृत्त्वरस्त्रेः अर्थवत्त्वं बंधस्यैवानु
पपत्त्वात् । नास्तीति । द्योत्यार्थवृत्त्या बोधकत्वस्यापि संभवेन सूत्रेणैव सिद्धेः । साच वृत्तिः स्वस्य पदस्य वारवादिश्च नृ एव शक्तिग्रहश
क्तिनाद्वारादिश्च न भ्यो बोधात् स्ववृत्तिरेवः शरीरस्त्रैलिङ्ग्यत्वादावेविवशं न समभिव्याहरेदुक्तादिपदानां तत्तदर्थकत्वेलक्षणेतिवादिनां मते पर
त्वेत्यत्र बाध्यं । परत्वं चात्र स्वानुच्चारणो अविनाश्यत्वं । अत एव धनमित्यादौ वर्णानां न प्रातिपदिकत्वे समुदायसंपादकैरेनवरितार्थत्वेन एमे
वृत्त्या बोधकत्वरूपताया धर्मग्राहकत्वाभावाच्च । अभेदविवक्षायामिति । अयं भावः । अर्थवत्सूत्रे अर्थवत्त्वं वृत्तिविषयबोधकत्वं शक्त् १४

स्यैव नवृत्तिविषयत्वं· मानाभावात् आश्रयत्वेनैव तदुपस्थितिसिद्धेः तथा च संबंधस्योभयनिरूप्यत्वेन संबंधिद्वयोपस्थापकत्वाद्विशेषाद्घ
टत्वावच्छिन्नशक्त्यैव घटादिवच्छब्दस्याप्युपस्थितौ सत्यामर्थबोधनतात्पर्ये सति विशेषणतया शब्दोपस्थितिः तत्तदभावे तु विशेष्यतयैव
पदम्· शब्दस्य ज्ञानसामान्यसामग्र्याजायमानविषयेणोपस्थितिः· अत एव प्रत्यक्षादावपि शब्दस्य भानमंगीचक्रुः· आकांक्षादिवशा
द्धाकार्थस्य शाब्दबोधे भानवन्नियमेन शब्दस्य भानादस्य अनुपस्थितत्वेपि न शाब्दबोधविषयत्वानुपपत्तिः· तत्र तात्पर्याकांक्षादिवशा
ज्ञो नित्यागोरनित्यस्या वा विवक्षातंत्र्येण विशेषणत्वेन वा भाने· प्रपंचयिष्यते चैतद्धातुसंबंधे प्रत्ययाः इति सूत्रे· अनुकरणत्वं च स्वाभि
न्नशब्दमात्रतात्पर्यकोच्चारणविषयत्वं· शब्दशब्देनानुकरणत्वमिति स्पष्टमेव· न च शब्दमात्रतात्पर्यकस्य गणपाठेपि क्रियावाचकस्य ग
णपाठाभावाद्धातुसंज्ञा न स्यादिति वाच्यं· आनुपूर्वीभेदस्यैव शब्दभेदे नियामकत्वात्· सादृश्येन तत्त्वाध्यवसायाच्च· अत एव नानार्थव्यव
स्था· साधुत्वस्यार्थविशेषपुरस्कारेणैव सत्वादसाधोरनुकरणशब्दपरे साधुत्वं नार्थपरे त्वकार्येत्यादि वक्ष्यामः· न चैवं शब्दपरत्वेप्यर्थवत्व
निमित्ता संज्ञा दुर्वारा फलोपहितत्वस्यार्थबोधकत्वस्य विवक्षितत्वात्· एतेन भूसत्तायामित्यादौ तिबाद्युत्पत्तिर्दुर्वारेति निरस्तं· फलोपहि
तक्रियावाचकस्यैव धातुसंज्ञासूत्रे विवक्षितत्वात्· यद्वा स्वसदृशशब्दमात्रतात्पर्यकोच्चारणविषयत्वं· अतो न काचिदनुपपत्तिः· यत्तु स

श॰ दु॰
१५
15

कृतिवदनुकरणमित्यतिदेशेनधातुत्वात्सुबभावइति॰ तत्रातिदेशस्यवैकल्पिकत्वेनसमाधानांतरस्यावश्यकत्वात्॰ शब्दमात्रतास्यैके
त्यत्रशब्दशब्देनवर्णरहितोध्वनिरुच्यते॰ अतएवपटदित्याहस्त्रपटच्छब्दानुकरणंध्वनेर्वीतिहृत्॰ ध्वनिमात्रानुकरणेवर्णोच्चारणला
तुत्वमितिनिरस्तमितिसुधीभिरूह्यं॰ अभेदपक्षोवाचनिकएवत्सपरे॰ भ म त्नायोमिति॰ ननुभेदपक्षेप्यनुकरणंचानितियरमितिगतित्वेपि
निपातत्वेचाव्ययत्वेरूपंसिध्यत्येवेतिचेत्त॰ संज्ञानियमपक्षेदोषाभावात्॰ प्रयोगनियमपक्षेपिअनुकरणंचानितीतिसूत्रंक्रियायोगप्र
वर्तेतइतितावन्निर्विवादं॰ पूर्वसूत्रेतथैवनिर्णीतत्वेनार्थाधिकाराश्रयणादित्यन्यत्रविस्तरः॰ भेदविवक्षायामिति॰ अर्थवच्छब्दस्यापिश
क्तिविषयत्वे॰ तत्रकेवलशब्देपिशक्तिरेवेतिप्रामाणिकाः॰ अतएवकृत्विणित्याहसादेनदोषः॰ नन्वलक्षणयानिर्वाहः॰ शक्त्यभावात्॰ न
न्ववर्णानांकृचिच्छकृत्वमितिवाच्यं॰ शक्यसंबंधाग्रहोपितद्बोधात्॰ विनिगमनाविरहेणनिर्णयस्यकर्तुमशक्यत्वेवसर्वेषांलक्षकत्वाप
त्तेः॰ समासनियमेनसमुदायस्यवृत्तिमत्त्वाभावेनचसमुदायस्यप्रातिपदिकसंज्ञानापत्तेश्च॰ अर्थभेदाच्छब्दभेदेनानयोर्भेदः॰ अतएवध्वनि
मयत्ववर्णमयत्वादिविरुद्धधर्मवत्त्वसिद्धिः॰ अस्मिन्पक्षेधातुत्वंक्रियावाचकत्वमतिगणपठितशब्दवाच्यत्वं॰ द्वावपिपक्षौलक्ष्यानुरोधेन
व्यवस्थितावित्यन्यत्रविस्तरः॰ लिंगबोधकेति॰ नचविभक्त्यौलिंगविशिष्टाग्रहणमितिनिषेधः॰ अन्यविहितविभक्तिनिमित्तकार्येअस्याप्र राम
१५

तत्वात् · ननु ङीपः प्राग्भावमारोप्यैवमुक्तं भविष्यतीत्याशंक्याह · तद्धीति · समासस्येत्यनुवृत्त्या अनुत्तरपदस्येत्यनुवृत्त्या च विसर्गोत्तरस्य एवाप
रत्वबोधनादुत्तरपदस्यासंभवे प्रत्यासत्तिन्यायात् कुंभादिरूपस्यैव ग्रहणादिति भावः · ननु बहुलक्ष्यसंस्कारानुरोधेन कस्मादिघटितो
त्तरपदस्यैव ग्रहणं प्रयुक्तमित्यत आह · किंचेति · कुमारीमाचष्टे इति · कुमारीशब्दश्चात्र नववयोविशिष्टस्त्रीवाची अपितु ओषधिवाची
तिस्त्रीलिंगः · अत एव प्रवृत्तिनिमित्ते वयोभिधित पुंस्त्वाभावान्न पुंवद्भावः · वयोवाचिकुमारीशब्दे तु पुंवद्भावोपि प्रयोजनं · णिचु तु
तत्करोति तदाचष्टे इत्यनेन · तदिति द्वितीयांतोपलक्षणम् · तदित्यनेन कर्मसमर्पकं प्रातिपदिकमुच्यते प्रातिपदिकाद्धात्वर्थे इति
वृत्तिवचनस्यैवायं प्रपंच इति वा प्राचीनां मतेन णिजपि फलं बोध्यम् · लोहितिकेति लोहितिं तरत्यपि फलं बोध्यम् · प्रातिशायनिकप्रकरणे
तारीद्वः पितो ब्र इति वाच्यम् अतरप्तमपमयोर्द्वः इति न्यायेन स्वार्थिकतरयोरपि बोधनात् रूपद्वयमिति तथा च लोहिता लिंगबाधनं वेति
कर्तव्यं · नन्वेवं युवन्शब्दात् तिप्रत्यये सर्वे ङीपुंस्त्वे प्राप्नोति · ततः प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति परिभाषया तिप्र
त्यये परे नीति स्यात् · नचैकेन स्वार्थस्योक्तत्वान्न प्रत्ययान्तरं स्यादिति वाच्यं · कुंडोध्नीत्यादावनङो स्वार्थस्योक्तत्वेपि ङीषुसत्तेः सिद्ध
त्वसिद्धत्वात् · अत एव कुटिकादंक्तिन इत्यत्र क्तिन इति पर्युदासस्यार्थवत्तार्थ इति चेन्न स्वाधिकारस्थप्रत्ययोत्तरत्वाधिकारस्थप्रत्ययाभावस्य

सर्वत्रग्रहणेनज्ञापनात्·तद्धिश्चावध्यायनीयादेश्चाचांष्कतद्धितइतिसूत्रेणचापंबाधित्वाप्यप्रत्ययार्थं·त्वद्रीयात्तुचापिसत्यप्येकादेश
स्यपूर्वांतत्वेनोक्तपरिभाषयावाप्यप्रत्ययस्यसिद्धत्वेनतद्दुप्यथर्थीस्यष्टमित्यादिनिरूपयिष्यामः·असंज्ञादिति·अन्यपदार्थस्योक्तत्वेनसत्त्वे
त्वयोगात्तद्योतकप्रत्ययंविनाप्रातिपदिकेनवक्तुमशक्यत्वात्·तदनुक्तौतुप्रकृतेबहुव्रीहिसमासत्वानापत्तेरुपसर्जनानांसमासांतत्वानापत्तिः
लिंगरहितान्यपदार्थवृत्तिसुत्तमानाभावात्·तथाचांतपदेनावयवत्वबोधनात्·कवुत्तरंटाबितिसिद्धांतः·उगितश्चेतिसूत्रेऽनुपसर्जनादित्य
धिकारेणास्यैवेतिभावः·एवेति·छात्रग्रहणात्कृतेऽलुक्तेचोक्तसिद्धांतावश्यकइतिबोधयितुमेवकारद्वयोपादानं·उत्तरपदस्येति·अवय
वावयवःसमुदायावयवोभवतीतिन्यायेनसर्वाणिलौकिकप्रक्रियावाक्येचरमावयवः·अतएवसुप्लुकि·एकदेशविकृतन्यायेनसमा
सांतेद्विगुत्वतत्पुरुषत्वादिलाभः·अवयवीभूयेति·इदंचचरमवाक्यंतदाबाधिताप्यपादानसामर्थ्याल्लभ्यते·अन्यथासमासादित्येवब्रूयात्·प्रवर्त्तेत
इति·बहुव्रीहिनिमित्तविशेषाप्यपदार्थवृत्तित्वकल्पनापेक्षयापि[illegible]इतिशेषः·एवमपि·एतेनसमासांतावितिद्विवचनबलाद्विधिद्वयकल्पने
नएकविधेःसमासांतविधानेनचाऽरितार्थ्येपिद्वितीयविधिसामर्थ्याद्बहुव्रीहेःपूर्वंअलौकिकविग्रहेसमासांतप्रवृत्तिसिद्धौबहुवचनंव्यर्थमि
तिपरास्तं·बहुव्रीहिनिमित्तापेक्षयापिपूर्वंप्रवृत्तसार्थंद्वितीयविधेरावश्यकत्वात्·छात्रग्रहणाबाधितार्थेनसंगच्छते·एवंचबहुकुमारीकइत्या

दोऽप्यंतमात्रस्यान्यपदार्थोपसंक्रमाभावादुत्तरसमासिशंकेवनेतिध्येयम् ॥ परस्तादिसेकइति ॥ अत्राहचिबीजंतुघकालतनेषुकालनाम्रइस्येत
न्मलकमुबं तात्त्विकोसत्तिरितिसिद्धांतविरोधः सुप्रहितस्यानुत्तरपदत्वंच ॥ पक्षेरसुपादानाद्धि न्यक्षेप्य चिबीधिता ॥ तद्बीजंतुसमासा
नारस्यतंशब्दबलात्सुपः परस्मान्नायमानेपिसुबंतादिपदेः कबंतस्यग्रहणेनकपः पूर्वभागमादायैववा बहुव्रीह्यादीनांप्रवृत्तेः सुलभत्वेनक
बुत्तरंपुनः सुपृव्यर्थः ॥ तथाचसमासांतविशिष्टस्यैवान्यपदार्थोपसंक्रांतत्वाद्बहुगोमत्केत्यादौ ङीप् ॥ बहुकुमारीकेत्यादौ ह्रस्वश्च न ॥ बहुच
र्मिकेत्यादावित्वसिद्धिः ॥ अभाषितपुंस्काच्चेतिसूत्रविहित कपि आत्वविकल्पस्तु ह्रकेत्यादावित्वंच ॥ एवंप्रवजानिरित्यत्रापिबोध्यं ॥ प्रक्रिया
ता वाक्येनिष्कुलससनंतरमंतरंगत्वाप्रेत्येनाबाधमानाभावेनजायायाइतिषष्ठीनिर्देशाच्च सुप्सुगुत्तरं ङिच्चेसनेन ङित्करणसामर्थ्यादाकारनिवृ
त्तिरितिविशेषः ॥ अत्रमूलेउत्तरपदशब्दः उत्तरसुबंतपरः अस्यायाह्रदरसंभवात् ॥ एतेनसमासादिपदानामुत्तरपदलक्षणायाबीजाभाव
इतिनिरस्तं ॥ अतएवबहुकुमारीकइत्यादिसिद्धिः ॥ अन्यथासमासविशेषबहुव्रीह्यादिनिमित्तबहिरंगकपः पूर्वमुपसर्जनस्त्रीप्रत्ययांतस्या
तिपदिकमात्रापेक्षोह्रस्वत्वादुर्वारः ॥ अतएवचनञ्सुभ्यामितिसूत्रोत्तरपदस्यकार्यित्वाश्रयणोप्यन्त्रचरस्यादावंतोदात्तत्वसिद्धिः ॥ अतएवकपिपूर्वे
मितिसूत्रंसार्थकं ॥ नचसमासस्यैत्यनुवृत्त्यैवइष्टसिद्धिरितिवाच्यं ॥ नञ्सुभ्यामिसस्यैपंचम्यंततत्वेनानन्वयापत्तेः ॥ नञ्सुभ्यांपरंयदुत्तरपदंतदंतस्य

श॰ कृ॰

१७

17

समासस्य समर्थाश्रयत्वेनान्तरङ्गत्वाद्दोषो ऽप्यापत्तेश्च। तदुक्तं समासस्य समर्थाश्रयत्वेन त्वन्तिमसंज्ञाया बहिरङ्गत्वाच्च। समासस्यानुवृत्तौ फलाभा
वाच्च। समासस्य सत्त्वविशेषणत्वेनाश्रयणे बाधकाभावाच्च। ध्वनितं चेदं गोस्त्रियोरुपसर्जनस्येत्यादौ भाष्ये। नन्वेवं बहुजरा का विसादौ जर
सादेशो दुर्वारः। निर्दिश्यमानस्येति परिभाषया कबन्तस्य व्यवहितत्वात्सर्वस्य चाभावेः। तस्मादावाद्या भवति। कस्मिन्नर्थे स्वार्थे। ननु चोक्तं
तत्र समासान्तेषु द्वौ पक्षाविति। समासान्ता अपि स्वार्थिकाः। उभयोः स्वार्थिकयोः परत्वात्समासान्ता भविष्यन्तीति भाष्ये परत्वादुत्कृष्टत्वादिति स्वार्थो
बोध्यः। कैयटस्तु महान्प्रमाद इति स्पष्टमेवतत्त्वविदां। समासावयवत्वे ऽपि उक्तयुक्त्या समासात्सर्वे समासयोग्यसमुदायात्प्रवर्त्तते समास
संज्ञा तु पूर्वभागस्यैव। समासावयवत्वं तु वाचनिकमेवेष्टं न चैवं कपः पूर्वभागस्यानर्थकापत्त्या वेकार्थीभावेनान्यपदार्थवृत्तित्वादिकं दुर्लभ
मिति वाच्यं। समासान्तविधानसामर्थ्येन बहुव्रीहिसमासमात्रे कार्यकर्त्तव्ये तद्वृत्तित्वकल्पनात्। अत एवास्मिन्पक्षे बहुकुमारीक इत्यादौ
ह्रस्वो न। अतः कबुक्तं सुष्ठु। अत एव बहुचर्मिके इत्यादावित्वसिद्धिः। अत एव चेदं प्रथमकार इत्यादाविदमेतत्तदः प्रथमपूरणयोः क्रियागण
न इति सूत्रेणाकप्रत्ययात्पूर्वमुदात्तत्वसिद्धिरिति प्रत्ययस्थात्कादित्यादिसूत्रस्थभाष्यबाधितपक्षान्तरं। अत एव बहुव्रीहौ सक्थ्यक्ष्णोरिति बहु
गवादिति सूत्रे उच्चस्थिदकरणां च प्रत्ताथं। समासान्तं प्रवृत्तौ तदन्तं वा भित्वा परत्वेन बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्वरप्रवृत्तौ ततो ऽपि प्रत्ययस्व

रामः

१७

रीविकृष्टसिद्धेश्चित्वैयर्थ्यं स्पष्टमेव॰ नच विरोधाभावेन विप्रतिषेधोऽयुक्त इति वाच्यं॰ एवमपि पूर्वे इचः प्रकृतौ प्रमाणाभावात्॰ आद्युदात्तस्या
नुदात्तं पदमेकवर्जमित्यनयोरधिकारयोरभावयोः सत्वेन द्विविधेनैवाभयोर्विधानेन विरोधस्यास्पष्टत्वात्च॰ सिद्धं तद्धितीयरक्षादृतिपथ्
वादिनामिति भावः॰ पक्षे त्विसुक्तया हविर्बोधिता॰ समासप्रातिपदिकसंज्ञयोः लुगुपजीव्यत्वात्सिद्धेषेणान्तरंगानपीति न्यायाद्वृत्ताव
यिपरत्वेन समासप्रवृत्तेः॰ अतएव सुबुत्पत्तिप्रयोजकीभूतप्रातिपदिकसंज्ञापि न अंतरंगानपीति न्यायाच्च॰ किंच विषयभेदेन समा
सप्रातिपदिकसंज्ञयोर्युगपत्प्रवृत्तिर्नशका॰ अपिच कपः पूर्वं सुब्लुक्प्रवृत्तावपि नास्माकं क्षतिः॰ समासनिमित्तसुबंतत्वानपाया
त॰ आरोपितार्थेनैवार्थवत्त्वात्सामर्थ्यमपि सुपपादं॰ तथाच समासप्रवृत्तिः कपः पूर्वभाग एव॰ उत्तरपदावयवत्वं त्वं तत्पदाद्व॰
समुदायावयवत्वं त्ववयवावयवः समुदायावयव इति न्यायात्॰ तथा चैकाच्द्विर्वचनन्यायेन समुदायनिष्ठधर्ममादायैव सुबुत्प
त्तिः॰ एवं चोत्तरपदावयवत्व पक्षेपि बहुचर्मिकेत्यत्रेत्वसिद्धिः॰ तत्रोत्तरपदावयवत्वपक्षस्त्वसार्वत्रिकः॰ अकारान्तोत्तरपदो द्विगुः स्त्रियामि
तिवचने उत्तरपदग्रहणात्॰ रात्राह्नाहाः पुंसीति सूत्रे अहन्निर्देशेन साहचर्यात्कृतसमासांत एव प्रवृत्ता विषुसिद्धेश्च अह्नादिग्रहणसा
मर्थ्यात्च॰ अतएव पंचगवं दशगवमित्यादिसिद्धिः॰ इदं च सामान्यापेक्षं ज्ञापकं॰ अकृतसमासांतेन कृतसमासांतग्रहणास्य॰ अतए

श·कौ·
१८
14

वपक्षयोर्न विरोधः॥ इत्यग्रे निरूपयिष्यामः॥ [illegible]नुतन्त्विति॥ ननु दृष्टामालादृष्टागोपीइत्यादौ वाक्यात्तु बुसत्यर्थेन दृश्यतु॥ न च लिंगविशिष्टप
रिभाषया दृर्वीरत्वेन ष्टापतीर इति वाच्यं॥ लिंगविशिष्टप्रातिपदिकस्येसर्थो इति चेत् तत्राप्युच्यते॥ प्रातिपदिकमध्यपदान्तरप्रवेशस्यैक
तुमशक्यत्वेन तस्मात्सहचर्यात् तथाभूतस्य ग्रहणं तयोर्ग्रहणं॥ नहि दृष्टादिवस्त्रमालादृष्टादिवस्त्रगौरीसाविवग्रहः रमागौरीत्यादेरेपदान्त
रप्रक्षेपः शक्यो मध्ये कर्त्तुं॥ न च नियमार्थमस्त्विति वाच्यं॥ युवतिकाब्रह्मबन्धूतरीति भाष्याद्युदाहृतत्वात्॥ इदं तत्प्रकृतिकतद्धितासंगतापत्तेः॥
न चैवं प्रातिपदिकग्रहणमपि व्यर्थं॥ परस्येत्तसंनेन प्रकृतेराक्षेपात्॥ यत्तु भाष्ये दावुक्तं अनुदात्तादेश्चेत्यत्र विभक्तिमन्तरेण सामर्थ्यान
वगमात्तस्य स्वानुवर्तिना सुबन्तात्तद्धितोत्पत्तेश्चानुदात्तेत्यस्य सुबन्तविशेषणतापत्तौ सर्वस्य विकारस्यार्वेद्य इत्याद्यसङ्गतं स्यात्॥ सर्वस्य सु
पीत्यनेनाद्युदात्तत्वात्॥ प्रातिपदिकाधिकारे तु तस्य च विशेषणान्न दोषः॥ सर्वेशब्दस्योद्दादिषु पाठेनान्तोदात्तत्वनिपातनादिति॥ तन्न॥
अन्तरंगादपि विधीन्बहिरङ्गोलुग्बाधत इति न्यायेन तद्धितोत्पत्तेः पूर्वं सर्वस्य सुपीत्यस्याप्रवृत्तेः॥ इति कौस्तुभे पितामहचरणाः॥ यत्तु सर्वे स्तो
मइत्यत्र लुगाद्युदात्तयोः समावेशेन विरोधाल्लुका आद्युदात्तस्याबाध इति॥ तन्न॥ विरोध एव प्रवृत्तौ मानाभावात्॥ तद्धितनिमित्तलुका बा
धस्य दुर्वारत्वाच्च॥ न लुमतांगस्येति सत्रस्थभाष्यपठितवचनेन लोपो वर्ण्यः समस्यान्तरं तत्र सत्र स्यादिति न्यायेन सुपीति सप्तम्याः षष्ठ्यर्थे कल्पने रामः
१८

अंगकार्यत्वाभावेन च न लुमतेऽस्याप्रवृत्तौ समासावेशस्य सत्वेऽपि एवं प्रवृत्तेर्दुष्परिहारत्वाच्च · किंच लुकः शब्दस्य लुकः प्रयोजकीभूत स
मासादिपरत्वस्यावश्यकत्वेन दास्याः पुत्र इत्यादौ आक्रोशे षष्ठ्याः समासयोः समावेशदर्शनेनाक्रोशादन्यत्रापि समावेशापत्तेः · यथा
कथंचिद्वेदांगीकारे तु प्रकृतेपि तुल्यं · परंतु अंतरंगानपीति न्यायः अकृतव्यूहपरिभाषाया मनेर्मते तः उक्तार्थे मते न बाधः · अंतरंगानपीति
न्यायेन बाधप्राप्तत्वस्यैव सुबुत्पत्तित इत्यत्र दीर्घो प्राप्नोति तत्प्रवृत्तिबाधनेन समर्थे परमार्थेको अकृतव्यूहपरिभाषाया ज्ञापकं न स्यात् · नान्तः
लुकापि प्रसक्तत्वेन निमित्तविनाशाभावेनोक्तन्यायाप्रवृत्तेरिति · तदज्ञानविजृंभितं · अंतरंगानपीति न्यायेन लुकः प्रयोजकीभूत तत
द्धितसमासादीनां सावकाशव्यवहितपूर्वप्रवृत्तानां वंतरंगापेक्षया बहिरंगावलंबं बाध्यते उपस्थितत्वात् · सुबुत्पत्तित इति दीर्घस्तु तद्धितप्रकृतिप्रकृ
तिकसुबुत्पत्तेः एवं प्रवृत्तः तद्धितेन बाधितुमशक्यः इति सामर्थ्ये यह शां ज्ञापकमेव · किंचांतरंगानपीति न्यायो लुकः स्थानिभूतप्रत्य
यनिमित्तकार्यस्यैव बाधकः उपस्थितत्वात् · अत एवांतरंगानपीति न्यायेनोच्छादिषु ठात्वे वाद्युपात्वाद्विहितमंतोदात्तत्वं न प्रा
प्नोतीति निरस्तं · किंच सर्वस्य सुपीत्याद्युक्तात्प्रवृत्त्यंगीकारे प्रातिपदिकाधिकारे कृतेपि सर्वेषां विकारः स्यादिति न सिध्येत · प्रातिपदिक
विशेषणत्वेन सुबंतविशेषणत्वान्तरं तत्परतिचेत् · गर्गादिभ्यो यञित्यादेन स्यात्पनुवर्तनेनाप्यपामिद्धं तेपि तत्प्रकृतिकलक्षणा

याः सर्वत्र तद्धितादिविधावावश्यकत्वेनानुदात्तादेशे सत्रानुदात्तादिप्रकृतिकात्सुबन्तादिसर्थोपत्तेर्ममापि सुबन्ताविशेषणात्वस्य तुल्य
त्वात्· प्रकृतोदाहरणे अनुदात्तादिप्रकृतिकसुबन्तत्वाभाव इति चेत् तर्हि प्रकृतोदाहरणे अनुदात्तत्वादिप्रातिपदिकाभाव इति ममापि व
क्तुं शक्यं· प्रातिपदिकाधिकारसामर्थ्यात्तदाभावे घितत्स्वरनिमित्तप्रत्यय इति चेत्तर्हि सर्वे शब्दस्यांतोदात्तपाठसामर्थ्यात्प्रकृतिस्वरनिमि
त्तप्रत्यय इति ममापि सुवचं· नन्वन्तोदात्तपाठपानाभाव इति चेन्न· तवापि लोपस्य तुल्यत्वात्· भाष्यग्रंथः सार्विरजंतप्रयोगश्च मानमिति तु
भयोरपि समानं· किं च लुगाद्युदात्तयोः समावेशो बहुव्रीहावेव· अन्यथा सुपीत्यस्य वैयर्थ्यापत्तेः· प्रथमोपस्थितत्तत्पुरुषं विहाय सर्वेलो
मोतिरात्र इति बहुव्रीहिमुदाहरन्भाष्यकारोपि प्रमाणं· एवं च सति प्रातिपदिकाधिकारो व्यर्थ इति चेत्· अत्र ब्रूमः· वाक्यार्थैकत्वादियोगस्य
वक्तुं शक्यत्वेन वाक्यात्तद्धितोत्पत्तेरनङ्गीकारात् तस्य प्रातिपदिकत्वं सुप्लुक् किं वा निष्टस्पष्टमेव· किं च पचतिकल्पमित्यादाविव धात्वादिष्वेक
वचनमात्रोत्पत्तिर्दुर्वारा· न च घकालतनेषु इति ज्ञापकान्निर्वाहः कदाचित्सुबन्तस्यापि प्रकृतित्वेनानुपपत्तेरभावात्· अपि चाग्रावि
त्यप माहेत्यादावनुकार्यानुकरणयोरभेदविवक्षायामपि सुबाधापत्तिः· आक्षेपेण लिंगसंख्याकारकान्वययोग्यार्थप्रतिपादकरूप
प्रकृतिलाभवत्प्रातिपदिकभिन्नानुकरणस्यापि आक्षेपसंभवात्· गोरित्याह इत्यादौ भेदविवक्षायां शब्दमात्रे सुबर्थान्वयदर्शनेनत

दुर्मोक्रांतत्वात्· किंच पुरुषस्य गोषावती त्याद्यौ हृतीयात्तिकं दुर्वारं· सिद्धांते तु प्रातिपदिकत्वाभावान्न दोषः इति यथान्यासमेव रमणीयं·
तिङर्थ इति· ननु स्तनकेशवती स्यादित्यादिलक्षणालक्षितं लिंगं तावद्व्याकरणे आश्रयितुमशक्यं· हारानित्यादौ नत्वाद्यभावप्रसंगात्· त
टस्तटी तटमित्यादौ लिंगत्रयनिबंधनकार्याणामसिद्धिप्रसंगाच्च· किंतूपचयापचयस्थितीनामेव पुंस्त्वस्त्रीत्वनपुंसकत्वादिव्यवहा
रः· अवस्थात्रयस्यापरार्थमात्रे साक्षात्परंपरया वा सत्वात्· अत एवात्मनि सर्वेस्याध्यस्तत्वेनोपचयादीनां परंपरासंबंधेन सत्वा
त्लिंगयोगः· व्यवहारकाले चोपचयादीनामसत्वेतिनाग्रहः· तेनभूतभाविनमुपचयमारोप्य प्रयोगो युज्यते· नहीह कश्चिदपि स्वस्मि
न्नात्मनि मुहूर्तमप्यवतिष्ठते इति भाष्यात्तथैवलाभात्· उपचयापचययोरपि स्थितेः सत्वेन स्थितिमात्रविवक्षायां नपुंसकत्वं· इत्ये
वाभिधाय सामान्ये नपुंसकमित्युक्तेषः· एतेनोपचयापचयादिविरुद्धस्यैकत्र समावेशायोगादेकस्य त्रिलिंगतानापत्तेरुपचयादी
नां लक्षणाकत्वाभ्युपगमे युगपद्व्यवहारानापत्त्या चात्माक्रमे साहचर्यकाण्याप संभवाच्च· शब्दनिष्ठमेव लिंगमिति परास्तं· किंच
लिंगस्य शब्दनिष्ठत्वेपि मध्वादिशब्दानां माक्षिकादौ एवं नपुंसकत्वं चैत्रादौ मधुपुंस्त्वमिति व्यवस्थानापत्तिः· यदि कोशलिंगानुशासन
बलात्स्थितिविशिष्टोपि माक्षिकवाचकः उपचयविशिष्ट एव चैत्रादिवाचकः एवं स्वरूपः उपचयविशिष्टः आत्मनि त्रितयविशिष्ट

स्यौचितत्वात्· अत एव सूत्रभाष्ययोर्न विरोधः· ततः नित्यमिति· अस्मिन्सूत्रे प्रसज्यांतरपक्ष एव· स्वार्थे तयपो अप्राप्तत्वात्· स्वाद्युदा
त्त एव· प्रत्ययस्य बहुउदात्तग्रहणात्स्यान्तस्त्तेः· तस्य एवं सूत्रे आद्युदात्तपरत्वात्· अत्र विसर्गशब्दस्य वाच्यार्थे क्रोधादिकल्पानानुवृत्तिः· राम
अत एव विनित्यग्रहणं च रितार्थं· योगविभागमात्रफलं तु चकारादिनापि सुवचम्· इदमेव द्विति निधाय पठितं द्याद्विभ्यश्चेति नियातनादु
३८

मात्वाहुरित्याद्यपाश्रवः इति कैयटः ॥ यत्तु कप्रत्ययेऽत्र अयजिव अयग्रहो व्यापादयितुं युक्त इति तन्न उपधित्वां समि नि निस्ति धृ इत्यादौ पद्रत्वा भा
वेपि इपि वां समिति परकारे रवग्रहस्य क्रियमाणत्वेनाकच्यपि सुलभत्वात् ॥ चित्रइत्यजा राजकाद्दन्यकइत्यादौ कप्रत्यये परकारे रवग्र
हस्याक्रियमाणत्वाच्च ॥ ननु नित्यमिति विभक्तस्तत्रैव वृत्तिविषय इति कैयटाद्युक्तेन युक्तं उभयोर्वा समुभयोः पुत्र इत्यादौ शय वासत्वादिना
विभक्तालुक्यपद्योद्वारत्वात् ॥ तत मिलाधुसज्ञेः एवं भयजनापत्तौ भाव्या दित्थं यविरोधापत्तेतिध्वनयन्नाशंकते ॥ नन्वेवमकचीतितत्व
ध्यापतितइतिन्यायेनाभयग्रहणेनाकच्चमहितस्यापि ग्रहणादुभयकाविधिरूपद्वारमेवेतिभावः ॥ ननु योगविभागस्पष्टसिध्यर्थे तथा लक्ष्य
भेदेन क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिरित्यर्थे लाभेपि तयोर्लक्ष्यरोकचक्षुष्य पर्केरस्मदादिभिन्नतात्पर्यग्राहकं विना निर्णेयोशक्यः ॥ किंच वि
भक्तस्तत्रस्य सर्वत्रप्रवृत्तो सूत्रांतरवैयर्थ्येन क्वचिदप्रवृत्तिरित्यर्थस्यास्मत्र लाभेपि प्रकृतसूत्रांतरस्यार्थं तेरे प्रत्ययविधानेनचारितार्थ्या
त्सर्वत्रस्वार्थेऽत्र अपवर्तुर्वारः ॥ तथाच कप्रत्ययेऽत्र यजभावेन किंचित्सत्राह कं तात्पर्यग्राहकमस्ति ॥ अकवित्वरूपेवेतिध्वनयन्नाह ॥ उभो पा
ध्यायस्येति ॥ अत एव सर्वोदिसूत्रस्थशब्दपाठश्चारितार्थः ॥ एतेनोभाविसत्रैकशेषाभावेनवृत्तेरभावाद्दृत्तिविषयेविहितस्याकचः प्राप्त्यभावेन ना
यकोपन्यायोनयुक्तइतिमंदोक्तमपास्तं ॥ तद्ध्वनयन्नाह ॥ तथाचेति एवंचेदं वार्तिकमुक्तयोगविभागसिद्धज्ञापकबाधितार्थानुवादमात्रम् ॥

उभशब्दविषयबोधनेनार्थादुभयशब्दविषय उक्तप्रायः। सलोकवार्त्तिके त्वयच्प्रत्ययान्तविषयप्रदर्शनं शाब्दं। ननु उभावतिक्रान्ताश्च सुभ
याद्दत्यादौ द्विवचनाभावेऽपि उभशब्दसाधुत्वार्थं टाप्ग्रहणमस्तु। न च भाष्यमते मात्र जितिप्रत्याहाराग्रहणात् ङीपि सति उभयीति प्रयो
गापत्तिरिति वाच्यं। उभशब्दस्य स्वार्थे विहितत्वेन तदर्थस्योपसर्जनत्वात्। तयप्साहचर्येणावयवार्थकायच एव ग्रहणाच्चेति चेन्न। वार्त्तिकस्य
वाचनिकत्वकल्पनापेक्षया ज्ञापकसिद्धार्थानुवादकत्वकल्पनस्य लघीयस्त्वात्। उभशब्दाद्यच्यपि द्विवचने एकादेशस्यान्तवद्भावे
न द्विवचनपरत्वेऽस्यार्थबोधकेन। किंच व्युत्क्रमेतत्। न हि कथमनुच्यमानं गम्यते। एकादेशे कृते द्विवचनपरोऽयमन्तादिवद्भावेनेति भाष्यै
केयटादिकृतव्याख्यापाठवार्त्तिकाभिप्रेतत्वानुमानाच्चेति ध्वनयन्नाह। टावेकादेशस्येति। द्वन्द्वपथाद्विति। परत्वान्नित्यत्वाच्च। टांगत्वा
देकादेशस्यैव प्रवृत्तेः। यत्तु द्विवचनान्तोपात्तोभशब्दस्तातोस्यात्रायजिसाहुः। तन्न। उभाभ्यामित्यादौ दोषापत्तेः। लुकि अयजनापत्तेश्च
उभशब्दादुत्पन्नमिति उभः शब्दोऽयमस्मिन्निति बहुव्रीहिः। स च प्रकरणादुभयशब्द एव गृह्यते तेनायचि कृते यत्रापञ्चुत्तरद्विवचनस्य लुका
अनपत्यप्रत्ययान्तोपात्तोभशब्दादयच्। स च भवन्नेव तदंगत्वात् सर्वं प्रवर्त्तते। एवं चायज्विशिष्टस्योभयशब्दस्य सर्वनामत्वात्सर्वनामप्रकृतिक
स्वप्रत्ययाघतत्वेन तलोपाद्युपपत्तिः। एतेन सर्वादिषु उभशब्दपाठाभावे उभयोरपि उभयोरिति शिष्टितेत्र लादेश प्राप्तो द्विवचनस्य श्रूयमाणत्वे रामे
३९

नायजप्राप्तेरुभपदेत्याद्यसिद्धापत्तेः। कृत्प्रचिन्त्यप्रयोजनाभावदर्शनार्थेयं भाष्यादिग्रंथः। अयुक्तः एवेति परास्तम्। तस्मात् उभशब्दा
दिस्तत्र नसुरूपः। वार्त्तिके द्विवचनटाबित्येनेन प्रवृत्तिः। सिध्यति। सा चापि हि टित्त्वादुभशब्दरूपे वा ख्याते। अत एव घटपटौ उभयाम्या मि
त्यादिप्रयोगाः संगच्छन्ते इत्याहुः। तन्न्यत्रेति। अपि चिकृत्तेः पक्षद्विवचनस्य लुकापहारस्त्वाय जितियथाश्रुतं नोक्तं उभशब्दात् टाचारा
द्वि पिरितिपरिकाल्पिबुसन्तेः द्विवचनस्य लुकानापहारस्ततो न्यत्वे पि द्विवचनस्य लुगभावादुभयती स्यादावयजनापत्तेः उभावि
त्यस्याबाधिते चेति द्वित्वे बहुव्रीहिवद्वा वा लुकि द्विवचने एवं वेडश्वोत्तरं वे उपजापत्तेश्च न चेष्टापत्तिः उभशब्दो द्विवचनविषय इति
दृश्चिभाष्यवार्त्तिककारादिभिरन्यत्रोभयशब्दप्रयोगांगीकारात् उक्तसिद्धान्तस्य भाष्यादिप्रामाण्येनात्रांगीकारात्। न चैवमुभसर्वत
सारित्यस्य उभशब्दाद्विहितोपस्तसिरितिव्याख्यानं कारक्रोक्तं विरुध्येतेति वाच्यं उभयशब्दाद्विहितत्वेपि उभशब्दाद्विहितत्वानपायात्। उ
भसर्वयोस्तसाविति षष्ठ्यातादृशसंबंधस्यैव बोधनादिति निरूपयिष्यामः। न चैवमुभयोमसिरित्यत्र स्वार्थिकोऽयच्प्रत्ययादिनिवाच्यं प्रस
यः परस्त्वेसत्राव्यवहितपरत्वस्यैव ग्रहणादुभावुदात्तावित्यस्य निर्विषयतापत्तेः। अर्थाधिकारे ताद्दर्वोत्तरयोरुभशब्दादव्यवहितोत्तरत्व
स्यैव ग्रहणाच्च। अत एव लिङ्गभ्याम् स्योभयेषाम् इत्यादिनिर्देशाः संगच्छन्ते स्यादेतत्। अनुमीयमानवाक्ये तयप्समानार्थकोऽयच्

श। त।
४०
40

प्रत्ययेते। उत स्वार्थिक एव। नाद्यः। उभाववयवौ ययोः तावुभयौ घटाविति समासापत्तेः। नान्त्यः। उभयो मणिः। उभये देवमनुष्या इति स्वार्थिकायजु
दाहरणपरभाष्यविरोधापत्तेरिति चेन्न। उभयशब्दे द्विवचनाभावस्यैकेपरादिभिरंगीकारेणोप्युपपत्तेः। विनिगमनाविरहेणायजभावस्य ह
स्याप्यत्वाच्च। कृत्रिमस्येति। संज्ञाविशेषे क्रियमाणाः संज्ञानियमः सामान्यापेक्षत्वात्कृत्रिममपि व्यावर्त्तयति। यत्तु भाष्यस्योभयशब्द
स्यासर्वनामत्वेन सर्वनामसंनिपातेन जायमानस्य कप्रत्ययस्य तद्विघातकत्वेन संनिपातपरिभाषया अजप्राप्तिरिति तन्न। कप्रत्ययस्य द्वि
वचनत्वसाधकपरभाष्यग्रन्थस्यैव वैयर्थ्यापत्तेः। असर्वनामत्वविघातकत्वासंभवेन सर्वनामसंज्ञायाः प्रवृत्तावपि अयजप्रवृत्तेर्मौना
भावाच्च। असर्वनामत्वस्याभिन्नत्वाच्च। उभशब्दे निष्ठासर्वनामत्वाविघाताच्च। अन्येति। नियमस्य विशेषापेक्षत्वेन सजातीयं कृत्रिमं त
रमेव व्यावर्त्तयेत् नाकृत्रिममित्यर्थः। द्विग्विति। द्विगर्थस्य कप्रत्ययस्य पर्यायस्य स्वार्थिकत्वाद्द्विवचनत्वैकादेशस्यैवं तिलेन सादिभाष्यात्कल्प
नस्यैव वैयर्थ्यापत्तिः। उभयो हस्तौ उभयोर्हस्ताविति षष्ठीसमासे उभयोहस्तौ उभयहस्ताविति सत्त्वाद् यजनापत्तिः। अपि चासंतत्स्वार्थिकेतरत्वादेरुभयत
त्वविशादिप्रयोगानापत्तिः। किंच कारकविभक्त्यंतादेव विधानेन किंचि॰ मानं। सुबन्तात्तद्धितोत्पत्तेः। कप्रत्ययस्यापि कारकविभक्त्यंतादेव
विधानाच्च। अपि चोभकयोः पुत्र इति षष्ठीसमासे अकच्सहिताद्यन्मध्यपतितास्तद्ग्रहणेन गृह्यन्त इति न्यायेनायचि उभकयपुत्र इति स्यात्तमते भाष्यमतेकप्र

रामः
४०

त्यये उभकपुत्र इतिस्यादिति महाविशेषः । अपि चाचारक्विबंतमहत्तिकं विजंतात्कुत्सितकर्त्तरि विवक्षायामुपसर्जनत्वात् कजभावे कप्र
त्यये स्वरूपमात्राश्रितत्वेनायच्युभयकाविति प्रयोगसिद्धिः । यद्युभयशब्दपाठेनोभयशब्दस्यापि सर्वनामत्वसिद्धिरिति । ननु एकार्थी
भावापन्नत्वेन नैरर्थक्यात्स्वसर्वीयवाचकत्वासंभवात् समुदायोपदेशे सौ तास्यर्याच्च । अनभिधानादिति । तत्प्रसंगात्तु अवयवद्वयारब्ध
मणिद्वयविवक्षायामेकशेषेणावयवद्वयारब्धैकमणेर्वा वाऽकृतावयवभेदविवक्षया वा बोध्यः । अत एव बहुवचनसिद्धिः । एकवचनं तु
तिरोहितावयवभेदविवक्षया । केयटेनेति । अत्राह चिविजं तत्सभयोः पुत्रः उभयपुत्र इत्यादौ प्राग्वत्करीत्यामुबुसन्नेः । एवमयजुस्तत्रोस्वा
र्थिकत्वेन द्विवचनेन समासांगीकारः । अत एवोभयत उभयत्रेत्यादेर्भाष्यमतेऽपि सिद्धिः । नास्तीति । अत्राह चिविजं तु प्राग्वत्कभाष्यप्रामाण्ये
न स्वरूपमात्राद्विवचनाभावपक्षाश्रयणमावश्यकमिति बोध्यं । छांदसत्वादिति । ननु प्रथमचरमेति सूत्रे उभयशब्दविषये विभाषावचनाभाव
सुब्भावेन भावोपस्थितो निषेधाः प्रबलीयांसो भवंतीति ज्ञापनेन प्रथमचरमेति विकल्पो दुर्वारः । अत एव विभाषाप्रकरणस्थादीनां विधिनि
षेधमुखेन प्रवृत्तौ दोषाय स्यान्नवेति विभाषेति सूत्रारंभः । किंच विभाषाश्वेत्यस्यार्थे प्रारब्धस्य नवेति सूत्रस्य प्रथमेत्यादौ दुर्वारत्वेनाक्त
दोषोद्धृतः स एवेति चेत् । अत्र वदंति । नवेति विभाषेति सूत्रे विभाषापदानुवृत्त्यासाकांक्षाचित्कत्वाभ्युपगमेनादोषः । तत्रत्यलक्षणानुरोधेन व्य

शा॰ रत्न॰
४१
५१

यस्याः किंचिन्निषेधाच्च बलीयांसो भवंतीति न्यायोंतरंगान्यायस्य बाधकोन· नथा तु लोपे त्यादिसूत्रस्थंभाष्यान्तथैव लाभात· द्वितयादिशब्दानां बहू
नामप्रत्युदाहरणेन भावतात्पर्यैकतायाएवोचितत्वाच्च· किंचातिदिष्टादुपदिष्टं बलीय इति न्यायोत्र दुर्वारः· परत्वात्किंतु समबलत्व एवैतस्य प्रवृ
विस्तरः· कैयट इति· अत्राहुः विबुजं तु उत्तरपदे तमप्प्रत्यये तत्वे व्यस्त तरशब्द पाठस्य नियमार्थत्वे नान्यतमशब्दस्य संज्ञाभावः सूपपादः·
अन्तरपायन्ते इति· एवंच नात्तमप्प्रत्ययतश्च नम्नि साहचर्य योगादनुदात्तस्यच गणे पाठ आवश्यक इति ध्येयं· अतइत्याधिक्यत्वेति·
सुपीत्यस्य विशेषणत्वे सर्वनामसंज्ञाने तिव्याप्तिकार्थः· तत्र च स्त्रीत्वं विवक्षितं अत एवं भाष्ये तरायां पुरास्वाहते· स्वाभिधेयापेक्ष इति विशे
षणं· नियमेव्यभिचारे वेत्याशयेन व्याचष्टे· स्वसेत्यादिना· अवधिशब्दस्यैतिसापेक्षत्वात्र दोषः स्वाभिधेयापेक्षावधीति सम्प्रत्ययमेव कथि
यते· कैयटहरदत्तादय इति· अत्राहुः विबीजं तु व्यवस्थानिमित्तो योनभवति स्वभावत एव योदिग्वाची तेषु रूपव्यतिरिक्त प्रवृत्तिनिमित्ता
नि पेक्षा दिग्योधावाचकः पूर्वादिशब्दस्याश्रीयते· दिशि वर्तमानाः पूर्वादयो निमित्तांतरनिरपेक्षाः देशकालयोस्तु व्यवस्थापेक्षा इत्यादि कै
यटहरदत्तादिग्रन्थबलात् दिङ्नाम्न्यंतराल इत्यादिसूत्रस्थभाष्याच्च· व्यवस्थारूपप्रवृत्तिनिमित्तस्य दिक्शब्दे भावेन संज्ञानुपपादा· नच व्यव राम
स्थायाम् इत्यनेन न प्रवृत्ति निमित्तं निर्दिश्यते अपितु विषयो निर्दिश्यते तेन वक्ष्यतः व्यवस्थायाः सत्वात्संज्ञा भवत्येवेति तैरेवोक्तमिति वाच्यं· ४१

एकरूपेणासर्वार्थप्रकाशनयोग्यत्वस्य सर्वार्थवाचकत्वस्याभावेन सर्वनामसंज्ञायाः कृप्तमशक्यत्वात् । तत्संज्ञाया उपपादयितुमशक्यत्वाच्च । अप
रिमितपदार्थापेक्षयाऽपि परत्वतद्विकल्पव्यवहारश्च दक्षिणागाथकादत्सत्राप्युत्कर्षापकर्षसत्त्वेन तस्याः सत्त्वाच्च । न चोक्तरूपस्य संज्ञाया वैक
ल्पिकत्वे नेष्टापत्तिरिति वाच्यं । स्वग्रन्थविरोधापत्तेः । व्यवस्थायामितस्यैवेयथार्थोपपत्तेश्च । किं च दिक्षु चिरंतनप्रयोगो नान्यत्रेत्यत्र छतर
प्रमाणाभावः । अपि चोत्तराः कुरव इत्यत्र संज्ञाया अङ्गीकारे दृष्टतरदोषाभावः । अन्तराद्युरिति । अत्राहुः चिरंजंतु पूर्वस्मिन्नपि विसा शैलस्योत्त
र्वेवोपपत्तौ रिणादिष्वेव संज्ञः प्रयोगोक्तः । अत एवाहुः । यावद्द्रव्यभावित्वयायो व्यवस्थिति । किं च दृष्टान्तोऽप्यसिद्धः । एतत्प्रतिपाद्यरूपाद्यर्थे
स्यैतच्छब्देन शक्त्या शक्यस्य वक्तुं शक्यत्वात् । बुद्धिस्थत्वेन शक्यतावच्छेदकावच्छेदकं । बोधस्तु प्रातिस्विकरूपेणेति सिद्धान्तः । नव्यास्तु प्रक
रणाज्ञस्य प्रातिस्विकरूपेण बोधस्य प्रकरणाज्ञस्य बुद्धिस्थत्वेन बोधाद्बुद्धिस्थत्वमेव शक्यतावच्छेदकं । तत्र भाष्यस्वरसोऽप्येवमेवेत्या
हुः । एतेन सोऽयं देवदत्त इत्यादौ भागत्यागलक्षणेति ग्रन्थाः परास्ताः । नीलमुत्पलं घटो नित्य इत्यादाविव विशेष्यविशेषणभेदान्वयस्य सु
लभत्वेन लक्षणाया उक्तिसंभव एव नेति कश्चित् । इत्याहुरिति । अत्राहुः चिर्चीजंतु प्रयोगकाले निरूढत्वाद्व्यवहारस्य प्रयोक्तृभिरेव प
क्षपाताणायाम् अपि इत्यादिकैः पश्चाद्धरदत्तादिग्रन्थबलात्कुरुष्वन्तरशब्दस्य व्यवस्थाप्रवृत्तिनिमित्तकत्वाभावस्यावश्यकत्वेन तदभावा

श॰ रत्न॰
४२
42

संज्ञायां नैव प्रवृत्तिः कुरूणामुत्तरेणाप्यासीनानामुत्तराः कुरव इति प्रयोगाद्व्यवस्थायाश्चाभावाच्च · किंच · सर्वनामानीति महासंज्ञाकरणाद्बला
दर्थस्य शब्दविशेषणात्तथा भासमानस्यापि पृथक्कृतिमित्तत्वे नाश्रयणाद् अभिव्यक्तपदार्था ये इति न्यायाच्च · प्रसिद्धार्थकारणानां पदानां तत्र निरपेक्षत
यान्तरङ्गार्थबोधकानां सर्वादीनां ग्रहणं · तेन संज्ञोपसर्जनीभूतानां न तथा चाधुनिकसंकेते कथं प्रवृत्तिः · अत्र इत्थं तत्त्वं · असंज्ञायामिति योगो वि
भज्यते · अत एव विभिन्ननिर्देशः संगच्छते · सर्वस्यायं शेषः · पर्युदासोऽयं · लाघवात् · संज्ञा चाधुनिकसंकेतः · तथा चाधुनिकसंकेतभि
न्ने प्राचीनसंकेते सर्वादयः सर्वनामसंज्ञका भवन्तीति वाक्यार्थः · तेन च विश्वेषां देवानामित्यादि सिद्धिः · एकरूपेण सर्वार्थप्रकाशनयोग्य
त्वस्य सर्वार्थवाचकत्वस्याभावेन सर्वनाम संज्ञाया अप्राप्तोवचनं · विश्वेषां देवानामित्यादौ शब्दस्य प्रवृत्तिनिमित्तत्वात् · एतेन दिश्यपि स
र्वनामता व्याख्याता · उत्तराः कुरव इत्यादौ तु नः उत्तरदिक्स्थत्वेन कुरुदेशस्योत्तरत्वात्तद्रूपेण यथा कुरुदेशे उत्तरशब्दस्याधुनिकत्वात् सा
नात् · यत्तु पूर्वादिसाहचर्याद्दिग्देशकालवृत्तीनामेव ग्रहणान्न दोष इति · तन्न दक्षिणादिसाहचर्येण कालवाचकानां ग्रहणानापत्तेः साह
चर्यस्यात्रानाश्रयणात् · न चैवं संज्ञाप्रतिषेधवार्त्तिकप्रत्याख्यानावसरे एवं पूर्वापरदक्षिणोत्तरपराधराणां व्यवस्थायां ततो संज्ञायां · सर्वा रामं
दीन्येव यान्यनुक्रान्तानि अस्मं संज्ञायां तानि दृष्टव्यानीति भाष्यविरुध्येतेति वाच्यं · भाष्यस्य प्रौढिवादपरत्वात् · वाक्यभेदात् समर्थसमासापत्तेः सा ४२

दीनां निषेधानापत्तेश्च · अभिव्यक्तपदार्था येइति न्यायेनवा गौणत्वाच्च · उपसर्जनत्वात् स्वस्य थमन्वर्थसंज्ञाया आवश्यकत्वेनैवैष्वप्रथमापत्तेश्चेति
मुधियो विभावयंतु · पाणिशिक्षादिति · नचैवमात्मात्मीयात्व्याभिधेयवाच्चं · गौणत्वापत्तेः स्वसृकेशानत्वोवारत्स्यायापत्तेश्च · यथान्याभिः तुप
पुंदेभ्यश्च प्रयोगेनव्यवहारयोग्यं पुंस्येवात्मीयस्य ग्रहणान्नदोषः · पुंस्त्वादिति · बधूकबंधुभवदेतदस्यामुखेन्दुनानेन सहोज्जिहानां · राजा
श्रियांशे शिवेयौवनीयास्वमाह संध्यामधरोष्ठरेखामिस्यत्र स्वशब्दः आत्मीयवाची · आत्मीयं च स्वस्वरूपमेव · आत्मीयेइत्येवेति · नचैवं
वचनं केशादावप्राप्तविभाषार्थं स्यादिति वाच्यं · पूर्वोत्तरसाहचर्येणाप्राप्तविभाषात्वस्यैवप्राप्यत्वात् · एतेन ज्ञातिधनाख्यायामात्मी
यत्वस्य सत्वाद्धि केस: स्यादित्यपास्तं · पूर्वोन्वयीति · आत्मनीयत्र शब्दाकांक्षायां स्वइति पूर्वमुपस्थितउल्लिंगान्वयप्रसंगोच्चिरीति · आत्मनी
यत्र शब्दाकांक्षायां स्वइति पूर्वमुपस्थितनपुल्लिंगान्वयप्रसंगोचितत्वात् · पुरस्कृतविशिष्टशब्दविधानं तु ज्ञातस्य र्थमावश्यकं · स्वंता यादित्वाभा
वेनोत्तरान्वयित्वमानाभावाच्च · उत्तरान्वयीति · पूर्वोन्वयेतु निर्देशेन लिंगबाधनेपिताः स्यैकत्वेनैव गौरवापत्तिः · आम्रद्रीत्यातुत्रिष्विति प
देन नपुंसकस्यापि बाधनाल्लिंगानुवादः · तत एव नयत्राह · तथा चेति · एतेन मूले चकारो व्यर्थ इति मतोक्तमपास्तम् · उपसंख्यानशब्दोपीति ·
नन्वेवमुपसंख्यानग्रहणं व्यर्थं · बहिर्योगे नैवकानार्थत्वात् · नच शाकाटनात्रयेशरीरसंपृक्तस्य तृतीयस्य चतुष्टयेतु शरीरसंपृक्ते चतुर्थ

श॰ रत्न॰
४३
43

स्य च तत्संयुक्ततृतीयस्य च बहिर्योगाभावादुपसंख्यानग्रहणमावश्यकमिति वाच्यं· बहिर्योग इत्यत्र बहिःशब्देन वासवस्त्रनोप्यभिधानात्
बाह्यत्वं च सापेक्षिकं· तेन शाटीरसंयुक्ततृतीयस्यान्वतुर्थ्योपेक्षया द्वितीयस्य तृतीयस्य च वा बाह्यत्वमस्त्येव· नचैवं बहिर्योगग्रहणमपि व्यर्थं·
अंतरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्यच्छिद्रात्मीयं विना बहिरवसरमध्यं तरात्मनि चेति कोशे बहूनामर्थानामुक्तत्वेन तद्व्युदा
सार्थमार्थकमादिति चेदत्राहुः· उपसंख्यानत्वप्रकारकशाब्दबोधार्थं तद्ग्रहणमिति सूत्रस्य हृदयं· टाबंतान्तराशब्दस्य प्रथमैकवचने प्रयोगो
नास्तीत्यन्तरणं तरेणेति सूत्रस्थभाष्यस्वरसः· महल्लाघवमिति· यथान्यासे तु सर्वनामसंज्ञाया वैकल्पिकत्वेपि न कप्रत्ययः स्यादित्यत्र सू
त्यसपामवस्थायां कप्रत्ययनिर्वीर्यातस्य सुबलादुत्पन्नत्वेन तस्मोलुकापहारसंभावनापि· अतरंगानपि विधीन्बहिरंगो लुग्बाधत इति
सायेन जसुनिमित्तसर्वनामसंज्ञाविकल्पस्याप्राप्तेः· अतएव द्वितीयकार्येऽत्यादौ तृतीयस्यापि तिविकल्पो न· अर्थाधिकाराश्रयणेन ज
साधारकार्य एव विकल्पप्रवृत्तेश्च· अतएव प्रथमचरमेति सूत्रे प्रथमके इति जसि रूपं न भवतीति कौस्तुभे पितामहचरणाः· नेमशब्दस्य
तु नेमके नेमका इति भवत्येव· अतएव यथान्यासे पक्षे शिट्स्वराभावः उक्तन्यासे तु शिट्स्वरो नित्यस्तथा स्यादिति निरस्तम्· निषेधो व्यर्थः इति·
ननु संख्ययाव्ययेति बहुव्रीहावुभयपदार्थप्राधान्ये एकद्वयत्र सर्वनामसंज्ञानिषेधार्थं सूत्रमावश्यकमिति चेन्न· प्रयोजनान्तरस्य भवेन रामः
४३

सूत्रवैयर्थ्यानुद्धारात्· समासांतानां समासावयवत्वाच्च· तत्स्वेभागस्य कार्याभावात्संज्ञायाः प्रवृत्तिः· अपरिसमाप्यार्थत्वेन सर्वनाम प्रकृ
तिकसुबंतात्वाभावेन च नाकच्· वस्तुतस्तु प्रकृतिभागस्यैनेरर्थकत्वान्न सर्वार्थवाचकत्वं· समासांतानां मुत्तरपदावयवत्वं तु न समावेत्रिकमि
ति प्रागेवोक्तं· अलौकिकेति· पद्यप्यलौकिक प्रक्रियायां वाक्ये समासादि प्रवृत्त्या एकार्थीभावादिकल्पनेनोपसर्जनत्वान्निषेधवैयर्थ्यं त
थाप्यलौकिक विग्रहवाक्ये एकार्थीभावादिकल्पनात्पूर्वं निषेध इत्यत्र तात्पर्यान्न दोषः· न चांतरंगानपि विधीन्बहिरंगो लुग्बाधत इति न्या
यान्नाकजिति वाच्यं· अकृतव्यूहपरिभाषाया मेवातभावात्· विभक्तिनिमित्तकार्यस्यैव बाधाच्च· लुकुश्च बृन विभक्तिनिमित्तकार्यस्यैव
बाधाच्च· मतुकुग्रहणामिति· न चैवमप्यंत्यस्य प्राप्नोति· अनर्थके ऽलोंत्यस्येत्यस्य निषिद्धत्वात्· नन्वेवं राल्लोपइत्यनेन ह्रूः हुरोडुरइत्य
ह्रोलोपो न स्यात्· न चानुवृत्तिसामर्थ्यं विकानुवृत्तिमात्रेणापि सार्थक्यादिति चेदत्राहुः· छकारवकारयोः समाहारद्वंद्वे कृते छकारेण त
स्य दुह्रोतरं मतुक्· आदेशेपि शकृद्यप्रश्लेषः· तथा च च्छ्वानत्तातरे तस्याद्यथासंख्यन्यायाच्चेष्टसिद्धिः· मतुक् छकारे तु न केवल छक
रस्यादेशः· मतुकुनिर्देशसामर्थ्यात्· एवं च बाधछ्ते रमत्स्येवान्वांशोवांशः इत्यादि· यद्वा मतुक एव निर्देशः· राल्लोपे तु न ध्यात्स्ये ति न त्वनि
षेधात्तल्लिंगात्केवलस्यान्वयः· मूर्ते इत्यत्र हि छ्लोपं विना न त्वप्राप्तिरेव न संभवति· एवं मूर्त्तो घनं इत्यादि निर्देशाः संगच्छंते· अस्मिन्प से

श॰ रत्न॰
४४
44

वांछते: शादेशोनेष्ट एव॰ शादेशयोग्यप्रत्ययपरत्वमेवास्य नास्ति॰ सं नियातनयहणात्सामर्थ्यात्सर्वस्य भविष्यतीति भाष्यप्रामाण्यादिति वाकल्प्यं॰
प्रकृतिप्रत्यापत्तिः भाष्ये हि सनुकू निर्देशमुक्त्वा केवलस्यापि विपिर्देशाइत्युक्ते शोपतेन केवलस्य शादेश इत्याद्युह इदं त्तु संमतं भाष्यविरुद्धमतश्चा
ह॰ यद्देति प्रकृतिप्रत्यापत्तिवचनमिति॰ एकवाक्यतया कार्यार्थानां विधाने ऽप्रतिबाधके सहभावे नैवलक्ष्ये प्रवृत्तिर्गम्यते॰ अत एव सन्नियोग
शिष्टानां सहैवाप्रवृत्तिरिति परिभाषैकदेशः संगच्छते॰ तत्रान्यतरापाये उभयोरप्यपायो ऽकृतव्यूहपरिभाषया भावः॰ निमित्तीभूतस्याहि स्य
स्य नाशात्॰ साहित्ये चात्रैकबुद्धिविषयत्वं॰ अत एव विल्वकादिभ्य इति सूत्रे छस्य ग्रहणं चरितार्थं॰ एवं स्थिते प्रकृतिप्रत्यापत्तिवचनमनित्यता
पकं॰ सह वतिवृत्तिरिति परिभाषैकदेशस्तु अकृतव्यूहपरिभाषायामेवान्तर्भूतः निमित्तापाये नैमित्तिकस्याप्यपाय इति न्यायोऽप्येवमेव॰ ए
तेनात्रत्यटीकाग्रंथः संगतमूलेन सह विरुद्ध इति मंदोक्तमपास्तं॰ सहभावस्यार्थरूपत्वात्सप्तमीनिर्देशाभावेन च परत्वासंभवात्॰ स्थानिव
द्भावप्रवृत्तियोग्यपरनिमित्तत्वं नास्ति॰ अत एव पादयातस्येति सूत्रे लोपवचनं चरितार्थमिति निप्रपंचितं प्राकू॰ भाष्यकारोक्तैवेति॰ अयं भावः
सूत्राणामतिगंभीरत्वेन न केवलं न्यायेनार्थनिर्णयः कर्तुं शक्यः॰ आर्थगुरुस्मृतसंज्ञानां सर्वनामस्थाने सादीनां दर्शनात्॰ ईशः सेइंडजनो
र्द्धेत्यादीनामेत्यादौ योगविभागफलाभावाच्च॰ तथा चेतिहासपुराणौ वेदार्थवर्णनवद्भाष्यमात्र्य सूत्रवार्त्तिकार्थविवर्णनीयः॰ भाष्यग्रंथस्यस्पष्ट राम
४४

तपोपलभ्यमानत्वेनान्यार्थपरतयानेतुमशक्यत्वात्· अविरोधे संभवति विरोधिकल्पनस्यान्याय्यत्वादित्यादि पूर्ववमेव निरूपितं सूत्रं तु माष्या
विरोधिनार्थांतरपरतयापि योजयितुं शक्यं· तथा हि· विभाषा दिक्समासे बहुव्रीहावित्यनेन दिक्समासबहुव्रीहौ विकल्पः· न च बहुव्रीहावित्यने
नान्यत्र विकल्पस्य निषेधः· तदुदाहरणं तु यापूर्वस्मैवोत्तरायस्यभ्रातस्य तस्मैएवौत्तरायेति· न च दिङ्नामान्यन्तराले इत्यनेन समासनिषेधः
शंक्यः विकल्पविधानस्य वैयर्थ्यापत्तेस्तस्य क्वाचित्कत्वाभ्युपगमात्· न चेदं लक्षणांप्रतिपदोक्तपरिभाषया समाधेयं एवं हि सूत्रे बहुव्रीहिग्र
हणस्यापि वैयर्थ्यापत्तेः न्यायानित्यत्वज्ञापनार्थं न्यायप्राप्तार्थानुवादकं वा नदिति चिन्त्यं हि तस्मात् न्वयान्नबहुव्रीहाविति सूत्रमपि तथैवा
स्तु· यत्तु द्वंद्वे चेत्यादीनामिव न बहुव्रीहाविति निषेधः समुदायस्यैव बहुव्रीहिपदस्य तन्त्रेव शाक्तत्वात्· तथान्यप्रियविश्वायेत्याद्यावंतरंगत्वा
त्। +सायाः संज्ञायामन्तरंतविधिनादुर्वारत्वेन तन्निषेधार्थं सूत्रं· अकृतव्यूहपरिभाषायां ज्ञापकं तु सर्वेषां समानमिति· तत्र· कार्यं विना
संज्ञाया अप्रवृत्तेरित्याहुः· भाष्यं तु वृत्तिकृद्व्याख्यानखंडनपरं बोध्यं· व्याख्यातश्चैतद्द्वितीयान्तस्य सर्वविभक्तिरिति सूत्रस्थभाष्यग्रंथ एवमेवोप
ध्यापेः· तत्रार्थे निर्णायकत्वकल्पनं तु कर्तव्योऽप्रसंगमुक्तसंज्ञायामिति भाष्यात्तस्मात्संतरमेव न बहुव्रीहाविति स्मृतेः स्मर्तृसंतराविरोधि
नत्वकल्पनाबोध्यमिति भाष्याभिप्रायः· केचित्तु स्मृतीनां विरोधे देशाचाराद्यवस्थापात्रऽन्यत्र दृष्टत्वात्· शवति गतिकर्मा कंबोजेषु विकारमे

श॰ वृ॰ रत्न॰
४५
45

नपाघोभावंतदतिपक्षशायांव्यवस्थाया: प्राभ्यकारैस्वोक्तत्वाच्चेत्स्यादुः· एतेनयस्योत्तरंमुनीनांप्रामाण्यमितिनोदाहृतापाः स्मृतेःसमतेर्वा
वयमपेनभाष्यकारोत्रैवव्यवस्थास्यादितिनिरस्तम्· यत्रतुभाष्यमन्यथाव्याख्यातुंशक्यंतत्रसूत्रानुरोधेनैवव्यवस्था· नन्ववर्णानामादेशात्सर्वस्य
सर्वनाम्नोविहितस्यटेः स्मरत्यर्थोगीकारान्तरोबहुत्वरूचेराह· नहीति· तथात्वंहुत्थपूर्वपदेग्रहणांव्यर्थं· पूर्वोत्तरपदयोस्तुल्यत्वात्· पूर्वपदेइति·
यत्तूत्तरपदेएवलक्षणापूर्वपदंतुतात्पर्यग्राहकं· एवंचपूर्वपदेसर्वार्थवाचकत्वमस्त्येवेति· तन्नेदंप्रष्टव्यं· पूर्वपदस्यार्थप्रतिपादकपत्ति· उते
वादित्रिनिरर्थकमेव· नाद्यः· बहुव्रीहौपूर्वपदेविशेषणत्वापत्तेः· गोगोरीचित्रागौर्यस्यादसत्रस्तितात्पर्येतन्त्रेणाचित्रापदस्योभय
त्रान्वयवतस्प्राप्तेपितदायन्तेस्त्र· नचेष्टापत्तिः जहत्स्वार्थावृत्तिरितिभाष्योक्तपक्षांतरेनदसंभवात्· किंचपूर्वपदार्थान्वयोपिदुरुप
पपादः· नांत्यः स्वार्थप्रतिपादनेप्रतिबंधकाभावात्· नेरर्थकेनसर्वार्थवाचकत्वाभावादेवाप्राप्तेश्च· विनिगमनाविरहेणपदद्वयेपि
लक्षणायायुक्तत्वाच्च· नचसुपांसंनिहितपदार्थगतस्वार्थबोधकत्वमितिव्युत्पत्तिभंगः घटपटावित्यादावसंभवात्· तस्मात्सद्वयेपि
बोधकत्वमितिभाष्यादिसंमतंयुक्तिसिद्धंचेतितत्रैवनिरूपयिष्यामः सर्वार्थतेति· सर्वार्थत्वमेकरूपेणसर्वबोधकत्वं· तच्चसर्वेघ राम
टाः सर्वेपटाउभौघटावुभौपटौसघटःसपटइत्यादावेकरूपेणैवबोधादृष्टं· नचसमभिव्याहारादिपर्यालोचनदशायांतत्वास्यान्निहो ४५

पितत्वेपितस्यपयोलोचनायांतेनरूपेणोपस्थितिः इतिनपेक्षासिद्धोहेतुरितिवाच्यं। पाठसामर्थ्यात्तदंशस्यैवरूपस्यैकत्वेनविवक्षितत्वेनादोषा
त्‌। अतएवसंज्ञाशब्देन। तत्रशब्दविशेषमात्रप्रकारतयाशाब्दबोधात्‌। एतेनसंज्ञोपसर्जनेचविशेषेअवतिष्ठेतेइतिभाष्यंआख्यातं। प
द्वाविशेषणतयाप्युपस्थितस्यार्थस्यमहासंज्ञाकरणाद्गुणपृथक्कृतयानिमित्तत्वेनान्वयेणादंतरंगः पदांतरनिरपेक्षः। प्रधानप्रसिद्धोर्था
ट्लभ्यते। तथाचसंज्ञोपसर्जनीभूतेनप्रवृत्तिः ध्वनितंचेदंकैयटे। सर्वत्रान्वयियोग्यत्वस्मिन्नपिकल्पित। प्रकृतेत्वस्मितसंबंधादिरूपस्यसर्वत्रा
वृत्तस्याप्रसिद्धस्यप्रवृत्तिनिमित्तत्वासंभवात्तदपेक्षार्थत्वादन्यत्रात्वेतुमयोग्यत्वाच्चेतिभावः। अयोगादिति। अतिक्रांतोभवकंतमतिभ
वकानितिमूलग्रंथेतुसमासार्थकथनंनाकचप्राप्तिविषयस्ततविग्रहप्रदर्शनं। तस्यालौकिकेप्राप्तत्वात्‌। इदंत्वयावकमशक्यमितिस्पष्ट
मेव। वस्तुतस्तुपूर्वोक्तलौकिकविग्रहवाक्यस्यसमासस्यचदृष्टांतत्वेनातिक्रांतइत्यादिग्रंथोव्याख्येयः। समुदायेचेति। समुदायस्यतु
पाठाभावान्नसंज्ञा। तदंतविधिनातुन। समासावयवीभूतस्यसर्वादेःस्वार्थप्रत्यनुपसर्जनार्थत्वेनस्वनिष्ठसर्वनामसंज्ञायांकर्तव्यायां
निमित्तत्वेपिसमुदायंप्रत्युपसर्जनत्वेनतन्निष्ठसंज्ञायामनिमित्तत्वादित्यर्थः। तदपिनेति। बुद्धिस्थोत्रहेतुः। अंगशब्दस्यसमुदायेनि।
र्बीजत्वलक्षणा। किंचेदृशार्थस्यसर्वनामसंज्ञाप्रवृत्तौनिमित्तत्वेमानाभावः गौरवंच। अपिचावयवस्यसर्वनामत्वेसमुदायस्यसर्वनामत्वा

भावेपिदोषइत्याह· अंगाधिकारे तदंते ति· किंचातिसर्वशब्दावयवसर्वशब्दस्य सर्वनामत्वे अग्य पुत्रगाज पुत्रातिसर्वइतिद्वंद्वे च विभाषाजसी-
ति विकल्पापत्तिः· न हि द्वंद्वरूपसमुदायं प्रति सर्वशब्दस्योपसर्जनता· गाथ्रत्विति· त्वत्कपितृकइत्यादावकचोपि निवृत्तिसंभवेन सूत्रम
वव्यर्थमिति भावः· दुर्लभेति· अतिसर्वायेत्यादौ संज्ञोपसर्जनीभूतानां प्रतिषेधात्· अर्थांतरसंक्रमात्इर्वतु स्वभावस्यैनैव प्रवृत्तिः अक-
च मुप्रवृत्तिरस्त्येव· अतस्तन्निवृत्त्यर्थं नं बहुव्रीहाविति सूत्रमर्थकं· समासे इत्यनुवर्त्तमाने वैयर्थ्यापत्त्या असमासे इति पदं छिद्यते· तेन
च वाक्यभेदेन पर्युदासमाश्रयणेनाकृतव्यूहपरिभाषया ऽलौकिके तदभावात् सिद्धे स्वसमासभिन्ने लोके प्रयुज्यमाने निषेधफलकत्वेन सं-
भावितवाक्ये निषिध्यते· अत एव सप्तमीति निर्देश इत्याशयः· स चावयवसमुदायनिषेधसाधारणः· आद्यफलं तु तदेवार्थतोक्तं मू-
लग्रंथे समासार्थवाक्येपि नेति तत्ध्वनयन्नाह· तेनेति· प्रत्यासत्तिन्यायेन प्रतिपदोक्ततृतीयासमाससंबंधिवाक्यस्यैव ग्रहणात् इत्यर्थः
न चैवमपि त्वत्पकासदृशइत्यत्र निषेधः स्यात्प्रतिपदोक्ततृतीयासमाससंबंधिवाक्यत्वादिति वाच्यं· एतादृशविषये पूर्वसदृशेत्यस्यापि
लाक्षणिकत्वात्· सदृशशब्दः सूत्रे विशिष्योपात्त इति चेत्· किं ततः न हि तस्य सर्वनामसंज्ञाप्राप्तायां निषिध्येत· यस्य सर्वनामसंज्ञा निषि-
ध्यते· मातुः सूत्रेनोपात्त एव· यत्किंचित्पदोच्चारणेन प्रतिपदोक्तत्वं तु कर्तृकरणेसमस्याविकुर्वीरं अत एव त्वयापूर्व इत्यादौ हेतुतृतीयांतेन पूर्व

सदृशेति समासे पूर्वखंडे सर्वनामसंज्ञानिषेधेन । तदंशे लाक्षणिकत्वात् । अत एव वकारोतिद्वारा सामर्थ्ये मासेन कृतः पूर्वः तस्मै मासपूर्वस्मै इ
ति समासे तत्संबंधिनि मासकृतायपूर्वस्मै इति वाक्ये च निषेधेन । एवंशब्दानुच्चारणेन लाक्षणिकत्वात् । न चात्रापि परत्वेन पूर्वसदृशेति वि
हितसमासेन भाव्यमिति वाच्यं । हेतुतृतीयायां परस्य तन्वयेऽचारितार्थ्यकरोतिद्वारा सामर्थ्यप्रवृत्तेः समासाभावात् । तृतीयातत्कृतेति सूत्रं त
त्कृतग्रहणसामर्थ्यात् करोतिद्वारा सामर्थ्ये प्रवर्त्तते इति स्पष्टं भाष्यादौ । अत एवार्थभेदेन मासपूर्वस्मै मासपूर्वायेति बोध्यं । न चैवं पूर्वैः स
मासे इत्येव सूत्रं वा तत् । पूर्वापरप्रथमचरमजघन्येति प्रतिपदोक्तसमाससंबंधिनो किंकवाक्यस्य ग्रहणापत्तौ पूर्वस्माद्व्याकरणादित्या
दावपि निषेधापत्तेः । परिनिष्ठितविभक्त्या समासे इति पक्षस्याभिभाष्यारूढत्वात् । किं च मासावरायेत्यादौ निषेधार्थापत्त्या सतैवोचि
ता । न चैवं पथ्यान्यालेपिपूर्वैर्वैयाकरणेन तत्रापि निषेधः स्यात् । न च फलाभावः । शिष्टप्रयुक्तस्वरप्रवृत्तेरेव फलत्वात् इति वाच्यं । एवं परे ति
सूत्रे तत्तृतीयापदानुच्चारणेन क्लिंवोपश्लिष्टितित्वेन तृतीयासमासपदे नाग्रहणात् । एवं च समासे इत्येव छेदः । तत्र च समासार्थकं वाक्यं इष्य
ते तत्त्वनाल्लोकिकं श्रदंते काकचोरविशेषात् । समासस्वरेण शिष्टस्वरस्य बाधाच्च । वस्तुतस्तु निषेधप्रवृत्तिफलकसमाससंबंधिनो वाक्यस्य स
र्वादिष्वनेनावयवानां निषेध इति ब्रुवतां मते तदंते संज्ञाप्रवृत्तिरस्ति उत न । आद्यपक्षमभिप्रेत्याह । तत्रैवेति । न चेति । सर्वादीनीत्यनुवर्त्तेः ।

ते एवं चागसाविद्यमानानीसंख्याहार्यमितिभावः· नन्वेवमपि सर्वादिशब्दस्य तदन्तपरत्वेन द्वंद्वस्यैवाभिधानात्तत्समुदायनिषेधो व्यर्थ इति चेन्न·
ज्ञापकादिना तदन्ते संज्ञाया अप्रवृत्तावपि सर्वादिशब्दस्य तदन्तपरत्वे मानाभावात्· अभेदे आधाराधेयभावानुपपत्तेश्च· न च व्यपदेशिवद्भावात्सि-
द्धिः· अयमेव ज्येष्ठः पुत्रो यमेव मध्यमो यमेव कनिष्ठः शिलापुत्रकस्य शरीरमित्यादौ लोके एकस्मिन्नपि अनेककृतव्यवहारस्य दर्शनेन तद्सिद्धे-
रः किती त्यादिज्ञापकाच्चेष्टसिद्धावपि वचनाल्लोकविज्ञानात्सिद्धमित्यादिना भाष्ये दोषस्याख्यानात्· नद्यादित्वादिव्यवहारवदेकस्मिन्नपि
दावाधाराधेयभावो दृश्यते· अत एव सिद्धो सासरद्भृति सूत्रे सप्तमी निर्देशो न कृतः· एतच्च निर्धारणमिति निमित्तं तु पञ्चे विधानार्थं इत्याहुः·
किंच· पदार्थस्यैकत्वेन द्वंद्वे विद्यमानो द्वंद्व इति वाक्यार्थे निष्पन्ने एकस्यां विधिक्रियायां एकस्य कर्तृत्वाधिकरणत्वासंभवः एकस्यैव द्वार-
त्वासंभवात्सत्वादिना कर्तृसंज्ञया अधिकरणसंज्ञाया बाधापत्तेश्च· तुल्यास्यप्रयत्नं सवर्णमिति सूत्रस्थभाष्ये तु पाणिनीयशिक्षादिवि-
रोधेन मूर्त्ता मुख्या सर्वांशुद्धिरितिन्यायेनाप्रौढिवादपरं बोध्यं· मुख्याधाराधेयभावविवक्षयाऽवयवस्यापि निषेधेन समुदायस्या· प्राप्तौ
तत्र निषेधवैयर्थ्यापत्तेश्च अतियत्किंचिदेतत्· निषेध्यायाम् इति· द्वंद्व इति सप्तम्यंतस्य निषेध्यक्रियायामधिकरणत्वेनान्वये द्वंद्वाधिकरण-
सर्वनामसंज्ञासत्ताभाव इत्यर्थे निष्पन्ने सर्वादीनां स्वस्य गौरवादनन्वयान्निष्फलत्वाच्च नानुवृत्तिरिति ध्येयं· अत एवानेकाल्शित्सर्वस्येति

सूत्रेणिग्रहणांचरितार्थं· अन्यथोपदेशेवर्त्तमानो सेयोलसत्तस्त्वकोभवतीत्यर्थ्यो गोकारैबाधकाभावेनानेकालत्वात्सर्वादेशोन्तरमित्संज्ञा
लोपयोः सत्वेनेष्टसिद्धौ किं तेन यत्तु यत्तु यत्र हि गुणः· कृतात्मसंस्कारः प्रधानोपकारायमहते प्रभवति तत्रात्मनोपि संस्कारसंनुसृत्यप्रधानेनसं
बध्यते इति न्यायेनादोष इति तत्र· यत्र हि प्रधानान्वयेयत्फलं तद्दपेक्षया अधिकं फलं तस्य चेष्टत्वे दृष्टतरं प्रमाणं पक्षयोः पदांतराभावश्च
तत्रोक्तन्यायः तथैवार्थस्यप्रतीतेः· यथा कृतिचेतिसूत्रे कृतीतिन प्रधानभूतयाक्रियया संबध्यते किंतु तच्छब्देन ताभ्यां गुणभूतत्वे
भ्यांतयाचव्यवहितेऽव्यवहितेचनिषेधः सिद्धो भवति· क्रोः कृत्करणंचात्रप्रमाणंइतिसर्वकोशकेभः: अत्रचमासात्प्रधानान्वयेसमुदाय
निषेधहेतुशास्त्रं यत्फलंनतदनन्वयेसाधयितुंशक्यं· तदनन्वयेयत्फलंतस्यचेष्टत्वेनदृष्टतरंप्रमाणं अप्रधानान्वयेसर्वादीनांसर्वस्यानुवृत्ति
रितिचापरं गौरवमितिनोक्तन्यायप्रवृत्तिः· युक्तं चैतत्· अन्यथा मासात्प्रधानान्वपरेतिकथं वा छिद्यते· द्वितीयपक्षस्तु येन विधिरित्या
दिसूत्रस्थभाष्यादिविरुद्धः· दूषणांतरमप्याह· किंचेत्यादिना चेधपीति· अपि भिन्नक्रमो बोध्यः· अरं तइति पक्षे पि अवयवनिष्ठ
कुत्सादिबोधकाकचिवर्णाश्रमेतरकेवर्णाश्रमेतरकोइति हपद्वयाभावसाधनेनफलेसुवच· एवं ध्येकयोरितिनिर्देशेन सदादीनांसं
कशेषाप्रवृत्तोद्विशाद्दिकशब्दयोः द्वंद्वफलं बोध्यं· नचैवं सर्वाचकत्वाभावः धर्म्मपरत्वादितिवाच्यं·· अप्रधानार्थत्वाभावेनप्रधानार्थ

केकशब्दस्य सर्वनामत्वानापत्तेरिति कश्चित्। शास्त्रस्यास्येति। अभावमात्रतात्पर्यकत्वेनेत्यर्थः। संज्ञानिषेधस्य हि संज्ञानिमित्तानेककार्य
तात्पर्यकत्वं युक्तं। संज्ञासूत्रस्यानेककार्योद्देशेन प्रवृत्तत्वात्। अलादेस्तु नावयवोद्देश्यतया प्रवृत्तिः। सर्वनामप्रकृतिकसमस्याघंतत्वा
भावात्। विश्वमेव येषामित्यादीनां तु सर्वनाम एवेति पक्षे प्राप्तिः। तदंतविध्यंगीकारे तु समुदायनिषेधे हि फलकल्पनैवोचिता समुदायाभावेपि न प्र
योजनं समुदायनिषेधे हि निमित्तविघटनद्वारा तत्र लाघभावः। शाब्दं फलमेकं च प्रवृत्तिरार्थं फलं। विभाषा जसीति सूत्रं एवमेकं च दि
न भवतीति भाष्यं तु समुदायनिष्ठकुत्वादिबोधकाकन्न भवतीत्यभिप्रायकं अवयवनिष्ठकुत्वाद्यबोधकप्रसक्तस्तु भवत्येव सच द्वंद्व
स्याप्यसाकं न तु द्वंद्वसमासे तत्र त्वन्यत्र न सहैकार्थीभूतस्य निषेधस्य कुत्वादावन्वयस्य वक्तुमशक्यत्वात्। तथा च द्वंद्वे शेषविषयेऽजा
सिद्धपद्धयं बोध्यं। एकार्थीभावापन्नस्यावयवस्य निष्ठस्य कुत्वादियोगाभावेनावयवनिमित्तकप्रवृत्तिरेव नेत्यपि वदंति। न्यायस्था
विरुध्येतेति। अयं भावः तत्र ग्रासमयासेद्धतिनावयवानां निषेधः अर्द्धतेकाकचोर्विशेषाभावात्। स्वरस्तु समासनिमित्त एव। सति शिष्टत्वा
त्। न च सर्वादीनामेव सर्वनामसंज्ञानिषेधे समुदायस्य सर्वनामत्वाभावस्यार्थसमाजग्रस्तत्वात् मास पूर्वायेत्यादौ स्मायाद्यभावः प्र एमे
योजनमिति वाच्यं। सर्वादिपठितसर्वार्थवाचकांतत्वेन सर्वनामसंज्ञाया दुर्वारत्वात्। समुदायनिषेधेपि तदभावस्योपपादनेपि तु शाकला ५८

च। परंपरासंबंधफलग्रहणेऽमानाभावाच्च। नन्वेवं ड्डुर इति प्रथमांते नैवोपपत्तौ सप्तमीनिर्देशो व्यर्थ इति चेन्न। उत्तरीत्यावयवनिषेधस्य वक्तु
मशक्यत्वेन सर्वेषां तुल्यत्वात्। चारित्वस्यापि सत्वाच्च। प्रक्रमानुरोधेन सप्तमीनिर्देशाच्च। ड्डुशब्दस्यापि सर्वनामत्वाभावबोधनार्थं तस्या
वश्यकत्वाच्च न हि प्रथमैकवचने सर्वनामकार्यं प्राप्नोति ड्डुशब्दस्य ड्डुशब्दस्थत्वेन युक्त्यन्तरं इति ड्डुरहस्य मर्यादेति सूत्रे स्पष्टमाकरे। त
त्रतदंत विधिना स्थानिवद्भावाद्वा सर्वनामकार्यं दुर्वारं। नच संज्ञाभूतत्वात्तदोष इति वाच्यं। ड्डुड्डुसर्ववर्जे नेड्डुड्डा निमहं तेधीरइत्यादावसंज्ञा
त्वात्। संज्ञाभूतस्य सर्वादिष्वपाठाभाव इत्यर्थस्य युक्तिसिद्धत्वेन भाष्यादावुक्तत्वेन चासंज्ञाभूतावयवं स्थानिनं वा निमित्तीकृत्य प्राप्तस
र्वनामसंज्ञाकार्यस्य गौर्वाणाद्युदाहृणपि निवारयितुमशक्यत्वेनोक्तप्रकारस्यावश्यकत्वाच्चेत्यग्रे निरूपयिष्यामः। जरसइति। ननु जर
सइत्यादौ स्वादिष्विति पदसंज्ञाधाराः भत्वेन हत्वं दुर्वारमन्नच भत्वेन बाधः। कार्यं विना संज्ञाया अप्रवृत्तिरिति प्राट ह्यसंज्ञाप्रकरणे भाष्या
दौ सिद्धांतितत्वात्। एकत्वाच्च। नच पदत्वाभाव एव फलं। अशास्त्रीयफलस्याप्युक्तत्वात्। राजइत्यादौ नलोपाल्लोपयोः संभावितत्वेन संज्ञाद्व
यप्रसक्तावाकडारादित्यस्य प्रवृत्तिर्युक्तैवेति चेदत्रोच्यते। वचनामर्थ्येन संज्ञे सत्त्वावंतीवेकत्वलाभ एकैव सुक्तिरेकैवेत्यर्थलाभार्थं। तत्सा
मर्थ्याद्बाध्यसंज्ञायाबाधकसंज्ञाविषयेन प्रवृत्तिः अत एव संज्ञेति चरितार्थमित्यलं। अइतिर्नांतस्येति। ननु भाष्याविरोधेनादितिपदच्छेदे

एवमत्रतात्पर्यमिति सिवकुंशाकं· इनादेशोतु इकारोच्चारणं सूत्रं व्यर्थमेवेति चेन्न अनाप्यकरत्वत्राकारांतो वा नांतो वेति संदेहवारणार्थमिकारो-
च्चारणात्· संदेहवारणमात्रफलकतया ऋदोरब्विध्यादौ सूत्रेष्व भ्रणानामाधिकारस्योपलंभात्· किंबहुनास्वकृतशास्त्रबाधोपि सुप्रनिपुण
ष्यैकचिदाश्रीयते· अनाप्यकदत्वादेनल्लोपः प्राप्ति परिकांतस्य त्वादीनापथा· उक्तं च श्यै च भाष्यमपि प्रमाणमिति मूलग्रंथार्थः एवंच
पूर्वविप्रतिषेधं संनिपातपरिभावाबाधेचनकिंचिन्मानं· भीमसेनीयत्राहेति· ग्यावर्द्धः पर्वतः तत्र भवो भाष्यकार इति कैयटादयः गोनर्दीयो वात्ति-
कारइत्यपि· अतिजरैरिति· नन्वत्र जरसादेशो दुर्लभः सूत्रे हस्वांतस्यानिर्देशात्· तथा च तदप्राप्तो संनिपातपरिभाषोपन्यासो व्यर्थ एव· न च
छ्छानिवर्तदादेशइति सूत्रप्रणयनात् छ्छानिद्धारा आदेशोपि निर्दिष्ट इति वाच्यं· येन विधिस्तदंतस्येति वचनप्रामाण्यात् तदंतस्यापि निर्दिष्टत्वा-
पत्तेः आवर्त्याभावेन परिभाषायां वैयर्थ्यापत्तेश्चेति चेदत्रोच्यते· जरायाइति सूत्रे तावत् निर्देश इति तावन्निर्विवादं· एवं च हस्वांतनि-
र्देशोप्यावश्यकः· तं विना तन्निर्देशस्य कर्तुमशक्यत्वात्· तदंतनिर्देशो तु न किंचिन्मानं· वस्तुतस्तु न छ्छानिवर्त्तसूत्रं जराया इति सूत्रस्य ज-
राशब्दो हस्वांत जरशब्दोपीत्यर्थपरं· किंतु हस्वांते जरशब्दे दीर्घांते न जराशब्दो रोपदस्यार्थपरं· वति घटितवाक्येन तादृशार्थस्यैव बोध-
नात्· एवं च हस्वांते आदेशप्रवृत्तेन निर्दिश्यमानस्येति परिभाषाया बाधः· येन विधिस्तदंतस्येत्यस्य तु संज्ञासूत्रत्वेन विधिसूत्रस्थजरा-

शब्दे जराशब्दांतपरोपीत्यर्थपरत्वं॰ एवं च तदंतेष्वादेशाः प्रवृत्तोपरिभाषाया विशेषस्य दृष्ट एव॰ अय मात्रावर्णोधिकवर्णो म्छानित्वबा
धक शास्त्रसहकृतलक्ष्य संस्कारकार्यांतरवाक्येष्छा निमित्तमय मात्राशब्दस्यादेशो न निवृत्ति रिति निर्दिश्यमानस्यादेशा भवंतीतिपरिभाषा
यात्मार्थ इति सुधियो विभावयंतु॰ ननु शास्त्रप्रवृत्ति इति आदेशानां न विशेषणं॰ शास्त्रप्रवृत्तिकाले तेषामभावेनयोर्यापर्यासंभवात्॰।
म्छानिनस्तु सूत्रेनोपात्ताः॰ एवं च शास्त्रप्रवृत्तिविषये नम्छानिनएवोपात्ताः॰ सप्तमीनिर्दिष्टशास्त्रेषु शीर्षलोपइतिवद्बोध्य इतिभ्रमं नि
रोकरोति॰ अत्रेति॰ अत्र परत्वपाठः म्छानिलाभउपायमाह॰ तत्रेति॰ छंदसीति॰ नचैवं येचतद्धितेइत्यादावनुवृत्तिस्यादितिवाच्यं॰ मं
डूकप्लुतेराश्रयणात्॰ विकल्पानुवृत्त्यर्थं तस्या आवश्यकत्वाच्च॰ इदं चकैयटानुरोधेनोक्तं॰ वस्तुतस्तुछंदोग्रहणाननुवृत्तिरेवयुक्तेति
तिस्पष्टं मूलग्रंथे॰ प्रत्ययविशेषइति॰ यद्यपिदृष्यन्वस्वश्वयोरित्यनेनाप्रत्ययेपिभत्वं विधीयते तथाप्यंगेनापि प्रत्ययाक्षेपादुक्ता
र्थलाभः॰ वतिप्रत्ययेत्वन्नं तभिन्नानामेवाप्तीतिनकश्चिद्दोषः तन्वाक्षेपोत्रानुमानं उत भसंज्ञासूत्रेणैकवाक्यता॰ नाद्यः भत्वेनांगनि
ष्ठस्य यजादिपरत्वस्याक्षेपेपुंशक्यत्वेप्यवयवनिष्ठस्याक्षेपस्तु मशक्यत्वात्॰ यचिभमित्यत्र यस्मात्प्रत्ययविधिरित्यस्यानुवृत्त्यांगस्येवतद्वि
धानात्॰ स्पष्टं चेदमाकडारीकासंज्ञानलुमतांगस्येत्यत्रभाष्ये॰ अत्रापि यथोद्देशपक्षः कार्यकालपक्षोवानाद्यः तत्पक्षेएकवाक्यता

शब्दरत्न· ५० 50

यात्र्यभावात्· सामर्थ्यासत्त्वाभावांतरवाक्योत्संज्ञोबाधकाभावेनवाक्यैकवाक्यत्वाच्च· एतेनांत्योपि निरस्तः स्पष्टं चेदं प्राग्दर्शसंज्ञासूत्रे भाष्य
कैयटविवरणग्रंथे· किंच यज्ञादिस्वादिपरो योऽन इति व्याख्यानेपि अनस्त्वोत्पादावनिष्टाप्रसक्तिर्दुर्वारा· नच निर्दिष्टपरिभाषया निस्तारः·
उद्देश्यपरद्वसादिसूत्रस्थभाष्यबोधितविधौ परिभाषोपतिष्ठते नानुवाद इति निषेधात्· नचांगस्य बाधसंसर्गे इत्यस्येति परिभाषया निस्तारः·
उक्तन्यायेमानाभावात्· यज्ञादिस्वादिपरा इति पक्षे परस्येवैयर्थ्यापत्तेश्च सत आह· एतच्चेति· भाष्यग्रंथस्त्विसं· एवं तर्हि कालसंज्ञापरिभाषं य
त्रकार्यं तत्रोपस्थितं द्रष्टव्यं· प्रथमेति तु उपश्लिष्टमिदं भवति· पञ्चम्यामिति· तत्र यज्ञापरतया अनकारं विशेषयिष्यामः अनोऽकारः यज्ञादिस्वादि
परस्यानो योऽकार इति· तस्याप्यं भाष्कृत्वः कार्यकालपक्षे एकवाक्यतापि इति तावत्त्रिविवादं· मा च पदैकवाक्यतान वाक्यैकवाक्यता· यत्र भश
ब्दस्तत्र यस्मात्स विधिस्तदादि यची तिच उपतिष्ठत इति सूत्रार्थः· अत्र चोपस्थितपदानाम् यथेष्टमभिसंबंधः· यथा ज्योतिष्टोमराज
सूयादिशब्दानां यागविशेषसामानाधिकरण्यान्नामधेयत्वावगतिः नतु यत्र दुःखेनेत्यादिभिः स्वर्गशब्दार्थावगमवद्वाक्यांतरेण· तथाप्रि
न्यक्षेमादिशब्दानां· ध्वनितश्चायमर्थः कौस्तुभे पितामहचरणैः· विधौ परिभाषोपतिष्ठते नानुवाद इति न्यायेन किंचिन्मानम्· नचोद्दिश्यमा
नस्थाने इति षष्ठ्यानेयं रहयामि तिवाच्यं· निर्दिश्यमानस्यादेशाभवंतीति परिभाषा परषष्ठी स्थाने इति सूत्रस्थानसंबंधलाभसुषष्ठानिवर्ते राम ५०

शइति ज्ञापकादिने तिभाष्यकारैः कृतत्वेन स्थानसंबंधस्य परिभाषालभ्यत्वाभावात्· स्थानग्रहणेन परिभाषाणां नियत्वमात्रकल्पनाच्च·
अत एवोदात्तस्वरितयोर्यणः इत्यादौ नानिष्टम्· ध्वनितं चेदं आर्धमासस्य क्लिष्टत्वादिति ग्रंथेन स्थलकृते तित त्रैवनिरूपितम्· प्रस्य यच्छादिति
सूत्रे आपीतिन ककार विशेषणं तांव्यवहितत्वादित्यादि तित्रैव स्फुटीकरिष्यामः· नचानएव विशेषणांकुतः इति वाच्यं· आगंतूनामंते निवेशः इति
न्यायेनानङ्सुत्तरं श्रुतं यचीसस्यापच्छिद्येतामान्त्रिथानेनन तद्विशेषणास्येवन्याय्यत्वादिष्टानुरोधेनतथैवांगीकाराच्चेति भाष्यविचारस्का एव
विचारयंतु· आवेडमिति· आवेडत्वं चात्र रेफषकारानधिकरणासमभिव्याहृतपदादवृत्तित्वं· अत एव मातृभोगीणाः इत्यादौ णत्वसिद्धिः॥
अत एवाचार्यादणत्वं च सप्रयोजनं· तेन रामनामनीत्यादौ उत्तरखंडस्य पदत्वाभावपक्षे पि दोषः· ध्वनितं चेदं भाष्ये· रामनमनमिस
होग तिकारकोपपदानां प्राक्सुबुत्पत्तेरिति सुपः प्राक्तत्समासेन त्वभवत्येव· सुबंतेन समासेनेति विवेकः· अत एव क्षुभ्नादिषु नृनमनशब्दपा
ठो योगिकार्थो गीकारे पिचरितार्थः· छंदस्यपि ग्रहादिसम्प्रवृत्तिर्न शंकाई दृशे विषयेऽवग्रहाभावात्· ध्वनितं चेदं प्रत्याहारान्हिके भाष्ये·
वैमिदिनेति· यत्तु मर्दे विधिप्रपेदृ हि घिर्वलवानिति न्यायेन पूर्वविप्रतिषेधमस्य असत्वान्नेदमुदाहरणामिति तन्न· उक्तन्यायेमानाभावात्· निषेधवि
धयाभावस्यापि निमित्तकार्यप्रविष्टत्वेनाकृतव्यूहपरिभाषयातदप्रवृत्तेश्च· अत एव न धातुलोप इति सूत्रे आर्धधातुक इति ग्रहणं दृष्ट्वा विशे

षणां धातुलोपइत्यपं बहुव्रीहिः तेनैकनिमित्ततालाभाद्बहुव्रीहिःतेइत्यादौनदोषइत्याकरः एतेन मतिग्रहणुहोऽस्येतिमन्त्रेसोगनुकर्षणार्थश्चकार
उक्तन्यापेज्ञापकः इडागमस्य एवं मप्रवृत्ता विकोपस्तिलितिमंतः किलात्पूर्वं शोवसिद्धौ किमनेनेतिपूर्णाप्तम् इडागमस्यापि प्राप्तत्वेनोक्तन्या
पेनकित्वाप्राप्तेः कित्वाश्रितोनिषेधः निषेधाश्रितं कित्वं चेत्यन्योन्याश्रयप्रसक्तत्वात् अप्राप्तोइडागमोदुर्वारः परत्वेन तस्यदुर्वारत्वाच
अतएवश्वितइतिच्छिते मंप्रमाणोपूर्वत्वेचोगतत्वेमतिभुक्तः कितीसेवसिद्धौ श्विग्रहणं ज्ञापकमितिपराप्तं भुक्तः कितीत्यत्रोपदे
शाधिकाराच्च ध्वनितं चेदं भाष्ये विहितेति अंगस्येत्यनुवृत्तं अधिकरणंप्रत्ययविशेषणं नचैवं गोधुक्शब्दादाचारक्विबंतान्तजा
ह्यविगनिषेधो नस्यादितिवाच्यं परविशेषणेपितदुहिसंगा त्वाभावेनप्राप्यसिद्धापत्तेः मथितमिति पयतमथितमाचष्टे मथितन्तस्यणम
स्यत्याहः तन्नमाथितिकइतिअकारलोपितत्वात्कादेशः प्राप्नोतीतिभाष्यविरोधात् अकारलोपइत्यस्यैवपर्यापत्तेः असमन्तं तेइका
देशप्रवृत्तिकालेकादेशाभावे सत्वेनोऽगप्रवृत्तिनिषेधेत्याद्यर्थबोधनार्थं शास्त्रप्रवृत्तिमात्रकथनतात्पर्यकत्वेनलोपादीनां सागेबी
जानापत्ते अतएववर्णग्रहणेमाथितिकइत्यत्रनदोषः समुदायग्रहणेदोषइतिप्रामाणिकभाष्यं सङ्गच्छते छाशासोरुपोरिति एकसूत्रा रामः
पात्तयोरेकरूपतैवोचितेतिभावः धात्विस्यत्यपवादकरणेविवक्षितः अतएवादंतत्वसिद्धिः नचवंजनस्याङ्गनिमित्तत्वाभावइतिवाच्यं मा ५१

प्रकृत्यासेनासिद्धत्वात्· यत्तु केयटेनोक्तं निमित्तापेक्षया परत्वविज्ञानाद्धूभिरित्यादीनां सिद्धिः· अकारलोपस्य निमित्तमार्धधातुकं न च त
स्मात्परस्य विधिः किं तर्हि तस्यैवेति· तन्न· तत्र हि वक्तव्यं न वक्तव्यं पूर्वविधौ वित्येव सिद्धं कथं पूर्वग्रहणेनादेशोऽभिसंबध्यते कुतः पूर्वस्मादा
देशादिति किं तर्हि निमित्तमभिसंबध्यते इत्युक्तत्वाभाष्येणावधित्वेनादेशस्यैव संबंध इत्यभिप्रायेणावस्थासांतरस्य प्रवृत्तिरित्यर्थस्य स्पष्टतया
अभिहितत्वात्· निमित्तस्यावधित्वेनाश्रयणे यथायोमेत्यायन्नित्यादीनां सिद्धौ स्थत्रभंगप्रवृत्त्यनापत्तेश्च· अत एव बाभ्रवीयरत्यादौ यलो
ये अवादेशो न स्थानिवत्· निमित्तस्यावधित्वेनाश्रयणे तु दोषः स्पष्ट एव· अभावातिदेशादित्यस्य एवं सिद्धं तिनत्वात्· न चादेशापेक्षया प
रस्य ठको विहितत्वेन नैवं धेयइत्यत्रालोपस्य स्थानिवद्भावः स्यात्· तथा च अचः इति ठक् न स्यादिति वाच्यम्· निमित्तस्यावधित्वेनाश्रयणे
पि दोषानुद्धारात्· अनिजइति निषेधसामर्थ्येन स्थानिवद्भावेन अच्कत्वेपि श्रुतिकृतं अच्कत्वमादाय ठक्प्रवृत्तेः ध्वनितत्वाच्च· न च तस्यो
पसंज्ञिः ज्ञेरपसंर इति व्यावृत्त्यर्थमनिजइति प्रतिषेध इति वाच्यम्· अचइत्यनुवृत्तिसामर्थ्येन आश्रयमाणाच्चोठक्प्राप्तेः· न चानुवृत्तौ मानाभा
वः· त्वकारस्यैव मानत्वात्· न च अज्व्यावृत्त्यर्थे अच इत्यनुवृत्तिरिति वाच्यम्· शुभ्रादिगणेऽपरिधिशब्दादीनामनेकाचां पाठेन प्रवृत्तेर्बोधनात्·
न च पंचमीसमासानभ्युपगमे एतस्मिन्नित्यादौ इत्यादिकं दुर्वारं· पूर्वस्य विधिरभावेन यथा संरक्षेकादेशस्य स्थानिवद्भावप्रवृत्तेरिति वाच्यं· धातो

शाबृरत.
५३
53

ऽित्यनुवर्त्तनेनधातुरूपाभ्यस्तग्रहणेनादोषात्‌·अभ्यस्तमितिमहासंज्ञाकरणेनलोपेऽप्रवृत्तेश्च·पूर्वोक्तऽित्यादोषाभावाच्च·अभ्यस्तरूपांगस्येत्य
र्थाश्रयणेदोषाभावाच्च·तन्वंतीत्यत्रांहरणपरिभाषयाअसिद्धत्वेनेडभावः·एतेनमथिष्ठभ्रातृत्वलताद्दक्किकादेशाभावार्थंपंचमीसमासत्री
वश्यकइतिमदप्रतारणमपास्तं·युक्तऽित्याभाष्यकारैरेवतस्यदूषितत्वात्‌·कादेशादृष्टापत्तिनतत्त्वेपितस्यनिष्ठापांसदीतिमेदमहणेना
सार्वत्रिकत्वावश्यकत्वेनतत्प्रवृत्तोदृष्टतप्रमाणाभावाच्च·निगाल्येति·नचात्रणिलोपात्पूर्वमंतरंगत्वाल्लत्वंभविष्यतीतिवाच्यं·अकृ
तव्यूहपरिभाषायाप्रवृत्तेः·नचस्थानिवदादेशइत्यस्यदुर्बलत्वेनोक्तन्यायाप्रवृत्तिरितिवाच्यं·अल्विधित्वात्‌·प्रत्ययलक्षणसूत्रंतुनिय
मार्थं·पृथगनुक्तेरिति·क्विपक्षेपि·आचार्यप्रणीतवाक्यस्यचारितार्थ्येनतद्भक्तिविषयकवाक्यकल्पनेतात्पर्याभावादितिभावः·शक्य
मकर्त्तुमिति·येनविधिस्तदंतस्येत्यस्यानित्यत्वज्ञापनार्थं·तेनसमासप्रत्ययविधौप्रतिषेधइत्यादिसिद्धमितिकश्चित्‌·नलभ्यतइति·अ
यंभावः·इत्थंहिभाष्यग्रंथः·अशक्यमतिष्ठुपिदृश्यते·शलादोषणीककुद्दोषणीयाचेतेमहादेव·तत्रशलाशब्दः·शारीरावयवविशेषवा
चाध्यांदमत्वात्कलोपेशलाकाकारोनिर्माणोऽदृत्ययेऽयंचप्रयोगअधिगुप्रेषादोप्रसिद्धः·द्वितीयंतुलौकिकोदाहरणं·अतएवप्रथमो
पस्थितशलादोषणीत्यस्यत्यागेबीजंचिंत्यमित्ययास्तं·प्रकारांतरेणापिसमाधानस्यकर्त्तुंशक्यत्वेनबीजस्यस्पष्टत्वात्‌·महादेववाहनस्येकत्वा एपी

५३

तत्ककुदस्य कत्वं वाह्वोर्द्धित्वमेव न प्राप्यं · यद्यपि वृषभस्य ककुदादिकमुत्पत्तिसिद्धमेव तथापि वाहनसमर्थं ककुदादिकं पाचते तेनावस्थाविशेषो
ध्वनितः · ककुदः एवेनियातात पत्तिश्च · एतेन ककुत्ककुदशब्दयोः कोशादिसिद्धत्वेपि ककुदस्यावस्थायां लोपइतिसूत्रमलोपनियमार्थं · एत
न दोषइत्यकारान्तस्यदोषत्वादेशइत्यपास्तं · एतेन प्रभृतिग्रहणस्य प्रकारार्थत्वेन किंचिन्मानं · न च पदादिष्वप्रयोगात् स्त्रियां स्त्रांतत्वमप्य समनद
तिमानमितिवाच्यं · एतेषां पदादीनां पादाद्यादेशत्वे यादादिप्पः पृथकुपदादिवचनस्य कोशेऽसंगतत्वापत्तेः · नहि स्थान्यादेशयोः पृथगुपादा
नेप्रयोजनमस्ति · स्थान्युपादानेनैव तदर्थाभिधानसमर्थ्यादेशस्यानुपादानेपि क्षत्यभावात् · अत एव तस्मा घादेशानां कोशेऽनुपन्यासो
न विरुध्यते · किंच प्रकृतिपदाद्यादेशानां अनुकरणानानुकृतस्यादेश इति पदाणं · पदाद्यादेशानांभिन्नत्वे स्थान्यादेशबाधकसूत्रस्य वैयर्थ्या
पत्तेः · व्यवस्थार्थे सूत्रकल्पने तु सोपरतत्रादेशस्य प्रयोगार्थं उक्तरीतिरावश्यकी · कोशप्रादानशब्दमात्रपरा इति प्रागेव प्रपंचितं · सोनसा
घादेशानां प्रयोगाभाव एवानुपन्यासेप्रभृतिग्रहणस्य प्रकारार्थत्वे फलांतरस्योपन्यासाच्च · अत एव मांसपृतनासानूनां मांसपृत्स्नवो वाच्याः
शसादौ वेतिपद्दन्नितिसूत्रस्थवचनेन्मादेशाह्रः प्रकारे · अत एव चमांसस्य चन्पाउत्वापाद इति संगच्छते · न च मांसस्यापिपुद्घञो इति पृष्ठाद
रादिवचनेन सिद्धिरितिवाच्यं · तस्योक्तसिद्धार्थानुवादकत्वात् · पृषोदरादिसूत्रेऽडनरपदेइत्यधिकारात् समासार्थमुक्तरीतेरावश्यकत्वे सा श

शब्दरत्न.
५४
54

यः एतेन माम्भ्यां वस्तुतस्तु इत्यादिलिङ्गं स्वकोक्तं मूलमयुक्तं हन्दर्भो अशुद्धः। इति मन्दप्रतारणमपास्तं नाम्मानिति षष्ठीबहुवचनेन सवर्णे दीर्घेणा
साविति बोध्यं यत्तु पररूपेणादीर्घमात्रं बाध्यत इति पक्षेणामानित्यस्या सिद्धिमाशंक्य बहुवचने इति योगविभागेन दीर्घ इति समाधायपरमाणा
मित्यस्य सिद्धिमाशंक्य न ह्रस्वनद्याप इति सूत्रे आज्जसेरसुगिति सूत्राद् आदित्यनुवर्त्य समाधानस्य भाष्यकृता त्वेनाकारान्तादपि नुडिष्यतामिति
रूपमाहुः तन्न चकाराभावेनानुवर्त्यासंभवात् मण्डूकप्लुतेरन्याय्यत्वाच्च पुरस्तादपवादा न्यायेन नाड्चीनां जनहणसामर्थ्येन च क्रमप्राप्तका
रबेपर्यायपत्या चैरस्कंदस्य कथंचिदपि स्थार्थक्याभावेन चाक्षः सवर्णदीर्घस्यैव बाधा इति भाष्योक्तेः हन्मनपक्षे अन्तरङ्गरूपापस्वृत्त्या भाष्य
स्यापौ छिवादपरत्वात् किंचादित्यनुवृत्तावपि एवंसूत्रे पञ्चम्यन्तत्वाद्ध्रस्वरूपावर्णान्तान्नुडित्येवार्थो नाकारान्तादिति तथाच तत्सामर्थ्यान्नु
डिति भाष्याशयः किंचाज्जसेरसुगिति सूत्रे जसः साहचर्याद्बहुवचनपरघटितविधिविषयाकारस्यैव ग्रहणं अत एव यङो चिचेतिसूत्रेय
ङः साहचर्याद् चप्रत्यय एवाटघ्यते इति हरदत्तादयः अत एव ह्रस्वनद्याप इति सूत्रे आप एवग्रहणं चारितार्थं ध्वनितं चेदं हृधातिभ्यांम्नम श्वान्नु
लोप इति सूत्रे च भाष्यकैयटयोः एतेन शेषविभ्यपावदिति मूलग्रन्थो व्याख्यातः वस्तुतस्तु हाहेति रूपोन्नरस्मृतः अन्यस्यासत्वेन दोषशंके
वनेत्यलम् अघाविरिति सुत्वस्यासिद्धत्वेनस्पदादीनामइत्यत्वेऽनादेगुणोऽगोतोगस्याजादिविभक्तिपरत्वाभावात् नादेशोऽस्त्विति दृनादेशा

रामः
५४

पिक्षयामुत्वेनासिद्धत्वमुनेतिसूत्रेवैयर्थ्यापत्त्या तद्विषये मुत्वस्य परत्वेप्यसिद्धत्वाभावबोधनद्वारा विभक्तिकार्यस्य पूर्वमप्रवृत्तिबोधनात् ।
नुम्यप्यस्त्विति । ननु नुम्विधावनुबन्धानामनेकान्तत्वेन नकारमात्रस्य विधिविषयतायाः कथं चित्संभवेपि नादेशेन संभव इति चेन्न । आ
देशेनुटप्रमीतिमापिदोषाभावात् । क्वचित्तु नुमप्येवेति एवकारः पठ्यते । नुमाङि । पुंसीत्येवं पठने न सर्वत्र नुमेवास्त्वित्यर्थः । नहि दृष्टो विषये प्रस
ङ्ग्यस्य परत्वपरत्वाभावे वा विशेषोस्ति । अत एव नादेशप्रत्याख्यानं भाष्यकारोक्तं संगच्छते । षट्त्रिचतुर्भ्यो हलादिरिति सूत्रे तु गोरोस
मासे च न प्रवर्त्ततेइति चतुरः शसीति सूत्रे भाष्ये स्पष्टं । एतेन तत्र एं सिश्रं षुमुनादेत्यसिध्यार्थकायानिष्टत्वं । उत्तरेण तदनुक्तेर्न्यूनत्वं च ति
परास्तं । विभक्तिकार्यं च विभक्तौ विभक्तेश्च प्रवर्त्तमानमविभक्तावप्रवर्त्तमानं गृह्यते तेनैतद्वक्ष्यन्नयन्नाह । अमुष्मैकुलायेति । नमुनेतिसूत्रवि
षये पूर्वं विभक्तिकार्याप्रवृत्तौ मुत्वे तस्यासिद्धत्वेन स्मैभावस्याप्राप्तावपि परत्वान्नुमि च असिद्धिरूपस्य स्पष्टैव । आदिनामुयोरित्यादिबोध्यं ।
अत्रापि पूर्वं विभक्तिरीत्या एत्वस्याप्रवृत्तौ मुत्वे नुमि वा निष्टं स्पष्टमेव । स्यादेतदेवेति । ननु औत सिलोपि स्य एतच्छ्रवणं न भविष्यत्येव । अग्निशब्द
स्यान्तोदात्तत्वेनैकादेश उदात्तेनोदात्त इत्यनेनोदात्तत्वात् इति चेन्न । अनुदात्तपदमेकवर्जमित्यनेनाग्निशब्दस्य सर्वानुदात्तत्वात् । अत एवोप
गवलं इत्यादौ तमप्योरुदात्तत्वनिमित्तीकृत्याकुपरिभाषया णो तस्य निघातः इति स्पष्टं भाष्ये हे । दीर्घोमाभूदिति तपरकरणं हि भिन्नका

लघ्वाद्यत्यर्थं · यथाऽऽतोगुणोऽस्यातो विधीयमानेनतु भिन्नकालानां मग्रहणंस्यात्प्राप्तं भावपितकारोच्चारणसामर्थ्येन ततःस्थानेऽलक्ष्यलक्षणोन्त
रेणप्राप्तेपि व्यावर्त्यते · दिव उद्दिस्या दीपथा · एवंचमकृतेमवर्णोदीर्घएवनस्यात् · टामुस्यादेवं · वाच्यरत्यातरभावस्यवक्तुमशक्यत्वात् इति
भावः · अतएवज्ञो विट्थेस्पष्टादिमकरणेनसमासबाधइवदापोबाधइत्यपास्तं · वार्त्तिकानुरोधेनसमासबाधोन्यमादित्यादिनत्रैवभय
चपिब्यामः · मोऽउत्येवेति · नचैवं उत्वसामर्थ्यात् मस्यापिटेर्लोपइतिक्वचनकल्पनेगौरमितिवाच्यं · प्रकारफलकथनत्वात् · उकारार्थस्या
न्यत्रकल्पितत्वेनलाघवाच्च · सिध्यतीति · विकल्पस्तुवाचनिकएव · स्पष्टंचेदंहृत्तिमाधवादिग्रन्थे · सांतेति · इत्यांतपक्षेइदमधान्तोप्रत्यय
इतिपक्षेबोध्यं · अंगवृत्तेरिति · एतेनसविशब्दादाचारक्विबंतात्क्विपितुकिमवितृशब्दात्आदेशेटिलोपेसावादइतिरूपंअनङि · अंसा
देशोसख्यादइतिरूपंस्यादितिनिरस्तं · प्रथमांतेनेति · षष्ठीप्रकृतिपक्षस्यपूर्वंदूषितत्वात्कल्प्यमानशब्दएवार्थांतरकल्पनस्याचितत्वा
च्च · पक्षांतरत्वेदोषाभावाच्चेतिभावः · बहुश्रेयसीति · अतएवसुतिसीतिप्रत्ययेरंगाक्षेपादतिखड्डरत्यादौनदोषइत्यपास्तं · उक्तफलसि
द्ध्यर्थमत्रांगाक्षेपात् · वेपधिकरणान्वयांगीकाराच्च · ध्वविष्टासुजातःध्रविष्ठइत्यत्रतद्धितलुकिस्त्रीप्रत्ययलुकिचप्रत्ययलक्षणेना
वंततत्वादितिव्याख्यावारणार्थंदीर्घग्रहणस्यावश्यकत्वाच्च · वस्तुतस्तुप्रत्ययग्रहणपरिभाषापर्यायेनविधिस्तदंतस्येतिसूत्रेणचदितछाणं

जइतिसूत्रेऽग्रग्रहणं तांतात्प्रातिपदिकाद्दित्यादिवद्गावंतांतादित्यर्थोपपत्तौ दोषालेशाभावः॥ नचैवंमालेत्यादावव्याप्तिः॥ अपरेशिवद्भावो॥
प्रातिपदिकेनेति निषेधादितिवाच्यं॥ उक्तपरिभाषाया अप्रत्ययविधिविषयत्वात्॥ अतिव्याप्तिरिति॥ अस्यस्त्रीईदेवदत्तस्यईदेवदत्तेत्यादा
वपिबोध्या॥ नकश्चिद्दोषइति॥ ननुसूत्रकारादिमतेलोपोदुर्वारः॥ नचेष्टापत्तिः॥ फलभेदेप्रत्याख्यानासंभवेनभाष्यग्रंथस्याकुलीभाव
प्रसंगात्॥ नहिरूपभेदेऽग्रतिवचनंयुज्यते प्रत्याख्यातुंसिद्धमित्यादिरूपःशाब्दबोधश्चकेनापि प्रयुक्तंत्वमित्यत्वकारोऽनुमुनेःपराभिमतत्वस्योपप
त्त्यर्थमेवप्रवृत्तंतथायुक्तंरूपभेदेऽपिप्रत्याख्यानं॥ तथैवग्रंथस्वरसतोलाभात्॥ वस्तुतस्तुतद्रूपिनेतिपूर्वमेवोक्तमितिचेन्न॥ आप्साहचर्येण
परभूतेङीप्याद्गुणादित्येकादेशविषयेऽप्रवृत्तेः॥ अस्यस्त्रीईगंगायाईगंगेइत्यादौहल्साहचर्येणाप्सूत्रीयात्त्वधर्मात्क्रांतस्यैवग्रहणान्नदो
षः॥ एतेनकस्यस्त्रीकीतस्माद्दावारभ्यक्विबंतादिति चिकीर्षत्यादौसूत्रकारादिमतेलोपोदुर्वारइतिनिरस्तं॥ सार्वधातुकार्धधातुकयोरितिगुणविषय
पितत्साहचर्याद्देवाप्रवृत्तेः॥ ङीप्साहचर्येणोत्पत्तिशिष्टजात्यक्रांताद्देवापोलोपविधानेनसूत्रमतेऽपिलोपाप्राप्तेः॥ अतिखट्वस्यत्र॥ अतिख
ट्वानिष्कौशांबिरिंद्रः॥ निष्कौशांबीत्यादौखट्वायाः॥ अतिखट्वाकौशांब्याः॥ कौशांबीत्यादावपिक्विबसुलोपादिकंभवत्येव॥ सूत्रमतेदीर्घत्वेसतिद्व्या
पृत्वात्॥ भाष्यमतेईकाराकारस्यत्वस्यतितल्लात्॥ यद्यपिखट्वायोर्दीर्घत्वेइतिवचनेनस्पष्टानिवद्भावनिषेधादतिखट्वः॥ निष्कौशांबिरित्यादौ उभा॥

स्याभावे लोपेनेति वदन्तो वार्त्तिककृतां मते अन्तरङ्गत्वाच्छत्वस्य सति विच्छेदे पश्चाज्जातेऽपि दीर्घे छत्वानिवृत्त्या विनतत्वोऽहस्यायोगाल्लोपाप्रसंगः· नच
स्तत्वमनुबंधं श्रुतमाकारमीकारं चादाय छत्वाश्रयत्वानुसंधानात्स्यादेव तुग्लोपः इति वाच्यं· एवं विधस्थापो लौकिकत्वेन ग्रहणायोगात्· छत्वानिवृत्त्या
वेतुउक्तपरिभाषा न प्रवर्ततइति सर्वसंमतं तथापि दीर्घसंभावनारहितादेशे छत्वानिवृत्त्या व निषेध इति वार्त्तिकव्याख्यात्रे दोषः· ननु वार्त्तिकानुरोधे
न सूत्रकारमते ईकाराकारप्रश्लेषो वाच्यः· तेनातितवृत्त्यादीनां प्रश्लेषेणैव वा सोदीर्घसहणा नियमार्थं भाष्यमते तु प्रश्लेषांतरं· न कदाचिदु
स्तत्वमन्वभूदिति· तेन मतत्रयेपि तुग्लोपादिकं न· न च प्रश्लेषो भाष्यकारैर्वार्त्तिकस्य सूत्रागतदीर्घस्य च प्रत्याख्यानायोत्प्रेक्षित इति सूत्रकारैः
कथं माश्रयितुं शक्यत इति वाच्यं· न सेष्टे तदृत्यादिवारणार्थं पाठापत्त्या त्रैःसूत्रकारैरेवाश्रयणात्· दीर्घग्रहणप्रत्याख्यानार्थप्रश्लेषांतरेएव
भाष्यकाराणां तात्पर्यावधारणादेकप्रश्लेषे सूत्रतात्पर्यानिर्वचनाच्च न च भाष्यग्रंथे एक एव प्रदर्शितो न तु द्वाविति वाच्यं· सवर्णदीर्घभूतस्यैव हि
रूपसत्त्वाद्दीतिचेन्न· अकः सवर्णेइति शास्त्रनिष्पन्नस्योक्तदीर्घस्य तस्मिन्नेव शाब्देकालत्रयेपि ह्रस्वत्वाभावेन दोषस्य दुर्वारत्वात्· प्रयोगान्तरग्रह
रोष्वंद्रूपा दीर्लोपानापत्तिः गोरवाच्च· मुनिद्वयानुरोधेन वार्त्तिकस्यैवान्यथाख्यानस्योचितत्वाच्च· लक्षणाबाधस्यान्याय्यत्वाच्च· अतएवस्यै
वेति· उकारस्यानुनासिकप्रतिज्ञयापि बोध्यं· वस्तुतस्तु गोजिवात्रनास्तीति सप्तमेभाष्ये स्पष्टं· गोमानिति· नच हल्ङ्याप्सूत्राभावे संयोगान्तलोपः

पुनर्दुर्लभः लक्ष्येलक्षणस्येति न्यायादिति वाच्यं । शतन्वान्तो रज्जेस्त्वतवान्यायाविस्यादिनिर्दिष्टात् । आभाविनेति । न च वचनसामर्थ्यान्न लभते इति निषे
धो बाध्यतामिति वाच्यं । फलाभावात् अव्यवहितपूर्वत्रासिद्धमिति सिद्धत्वबाधेन चारितार्थ्याच्च । आवश्यकतया चेति । विकल्पार्थमिति भा
वः । ननु भाष्ये वा नपुंसकानामित्येव पठितं । एवं च सूत्रे संबुद्धिग्रहणाभावे वार्त्तिके कथं तदर्थो लभ्यते इति चेन्न । वा नपुंसकानामित्यत्रैव पठनीये अ
त्र पाठेनोक्तार्थज्ञापकतायाः स्फुटत्वात् । न हि वार्त्तिककृद्दृष्ट्या सूत्रकृतः प्रवृत्तिरिति न्यायेनायमर्थो वक्तुमशक्य इति चेत्तर्हि सूत्रमतेऽप्यस्यार्थस्य सं
बुद्धिग्रहणस्यावश्यकत्वेन सिद्धं नः समीहितं । अत एव पर्यायन्यासेहेराजन्नित्यादि सिद्धिः । संबुद्धिग्रहणस्य नपुंसकमात्रविषयत्वे तु सर्वोपप्ल
वः स्यादिति । ध्वंतादसंभव इति । अत एव ङीप्साहचर्याद्दाप्योपि भोरेव लोप इति न मतभेदः । ननु कोऽत्र हानिस्तस्य स्त्रीकीतस्माद्दाचारक्विबं
ताघङ् लुकि लङि । अचेकेटिस्यादौ संभवोऽस्येवेति चेन्न । उक्तयुक्तेः । आचारक्विबंताघङ् लुगभावस्यासिद्धवदत्राभादिति सूत्रे भाष्ये ध्व
नितत्वाच्च । तत्र हि अतो हेरित्यत्र भस्य पादिति संबंधेनाकारान्तभस्य पासरस्य हेर्लुगिसर्थाज्जहीत्यत्र दोषाभावेनासिद्धवदत्रेति सूत्रं मारिखापि
ष्ठितं । तच्चोक्तार्थकल्पनेन एव संगच्छते । अन्यथा कथमाचारक्विबंताघङ् लुकि हेर्लुगनापत्त्या फलभेदाप्रेर्नो सूत्रप्रत्याख्यानमसंगतमे
व स्यात् । पूर्वोत्तरत्वेनेति । नन्वेवं वृद्धादिस्यादेरोमन्निपातनया भौ पर्यायपर्यायमिति भाष्यग्रन्थो विरुध्येतेति वाच्यं । लौकिके आनंतर्ये अनंतरादिव ज्ञावामाक्ष्या

श॰र॰
५७
57

प्रकृतिप्रत्ययसंश्लेषविघातस्यास्पष्टत्वात्. प्रकृते च एवं तत्वेन हल्ङ्याब्भ्य इत्यस्य प्रवृत्तिः इति स्पष्ट एव विशेषः॥ अभिनोत्रेति. संयोगान्तलोपो
ऽत्रेष्ट इति वार्त्तिके विनिगमकाभावान्नमुनेति वचनं ह्यत्वे कर्त्तव्ये कृते च तिवाद्यो नेनेडः परां तादितिपूर्वरूपे कर्त्तव्येपि संयोगान्तलोपो नास्ति सिद्धः॥
अत एव हरिवोत्रेति प्रयोगः संगच्छते. अत्र च प्रकृतसूत्रस्थभाष्यसंदर्भ एव मानं. नलोपे कृते इति. अंतरंगत्वान्नित्यत्वाच्चेति बोध्यं. वस्तुत
स्तु संयोगान्तलोपस्यासिद्धत्वादित्यपि बोध्यं. सावमिपरं भवतीत्यस्मिन्पक्षे सुप्रत्ययपरत्वावृत्तिपरत्वं निमित्तीकृत्य प्राप्तनलोपनिषेधार्थं नङि
संबुद्ध्योरिति सूत्रस्य चारितार्थ्येन तदभावेन किंचिद्बाधकं न किंचिद्बाधकमिति. ननु सुपीः शशीः स्याहो संयोगान्तलोपं बाधित्वा पदान्तसंयोगादि
लोपः स्यात्. तथापर्वमर्वन्तरिगो हर्यणितिकौ त्वापयमपुष्ट्वादीनायरू लुकिलडि. निश्वसियोः संयोगान्तलोपस्यासिद्धत्वेन सलोपः लोपो व्योर्वलि लो
पाप्तिः॥ यथान्यासे अकृतव्यूहपरिभाषया परत्वान्नित्यत्वाच्च हल्ङ्याब्भ्य इति लोपप्रवृत्तौ वल्परत्वाभावेनाप्रवृत्तिः॥ न च प्रत्ययलक्षणं. वर्णा
श्रयत्वात्. अत एव न स्थानिवद्भावः एवं च महदनिष्टं स्यादिति चेन्न. काष्ठशकष्ठातिसूत्रे परेश्वर्यांकयोरिति सूत्रे सलपरसंयोगादिलोप
मारांक्यतद्वारणार्थसहीतिवक्तव्यमित्युक्त्वा काष्ठशगेवनास्तीत्याष्टमिकभाष्यरीत्यानभिधानात्॥ ॥ तस्किद्विचोन स्महदसुक्तं. इदं च यद्यपि कौ
तं प्रक्रमस्येवोक्तं संतानां च सुपीः सुपयादस्यादिप्रयोगाः संतितथाप्युक्तभाष्यप्रामाण्यात् ककारस्याहचर्येणोदृशो विषये पदान्तेपि संयोगादिलो

राम
५७

पाप्रवृत्तिः कल्पते॰ युक्ततरं चैतत्॰ अन्यथा सुपि स्थानां सुपयस्थानामित्यादौ दोषस्य दुर्वारत्वेन सडीत्यस्यावश्यकत्वापत्तेः॰ सनः सकारमारभ्यम
हि ङेङ॰ कारोप्रत्याहारः॰ किंच तिप्यनस्तेः सि पिधातो रुर्वेति सत्राम्यां विभक्त्यानवयहलुत्र एवि भक्तिहलि संयोगादिलोपापेक्षयापि संयोगान्तलो
पस्य बलीयस्त्वा [redacted] पि सर्थं स्तापनेन दोषाभावात्॰ नच कासधातो र्णिचि विचि आचारक्विपि लङि॰ प्रकारार्थके प्रभृतिग्रहणसामर्थ्यात्ति स्त्रियोः अ
दा दित्वाच्छ्लुकि णिचः स्थानिवद्भावेन संयोगादिलोपाप्राप्तौ सूत्रद्वयचारितार्थ्यं स्पष्टमेव निवाच्यं॰ इदृशे विषये सभावस्य दुर्वारत्वेनानर्थ
रित्वस्यासंगततापत्तेः॰ अनत्तेरिति पर्युदासेन धातुग्रहणसामर्थ्याच्च नामधातावप्रवृत्तेश्च॰ एतेनाशाशाशित्यादौ दोषः इत्यपास्तम्॰
कांतेयङ॰ लुगभावस्य कस्य चदृङ्इति सूत्रे हरदत्तेनोक्तत्वाच्च॰ लोके यङ्लुको ज्ञापकसिद्धत्वेना सार्वत्रिकत्वाच्च॰ एतेन पर्वं सर्वेत्यादिक
मपास्तं॰ ध्वनितं चेदं यङ्लुकि मूलग्रंथे॰ किंच हल्ङ्याप्सूत्रे लोपो व्योर्वलीत्यनुवर्त्य वाक्यभेदेन व्योर्लोपविधानसामर्थ्यादंतरंगत्वाच्च॰
व्योर्वलि लोपइतिवक्तव्ये विधिपस्य लोपस्य प्रथमोपादानेन बाधकार्यपेक्षया प्रथमप्रवृत्तेर्बोधनेन च यथान्यासेपि हल्ङ्यादिलोपापेक्ष
यापूर्वं प्रवृत्तत्वेन दोषशंकैव॰ नचाव्यवहितवेरपृक्तस्य लोपेपेक्षया प्राबल्यबोधनेपि व्यवहितहल्ङ्याद्यपेक्षया प्राबल्यबोधनेन मानाभावोऽति
वाच्यं॰ भाष्यात्तु वीत्यावेरपृक्तस्येत्यस्य योगविभागेन व्यंते लोपसिद्धौ प्राबल्यबोधनस्यैवेयर्थ्यापत्तेः॰ नचैवमपि राजेः धते च क्विप् अत्र राजा

द्यारंभसामर्थ्येन तद्बाधात्। एकत्वे एकवचनमेवेत्याद्यर्थनियमे द्विवचनादीनां आवर्त्तनेपि एकत्वादावेकवचनादीनां विधानाभावेनोक्तार्थानामप्रयोग
इति न्यायस्याप्रवृत्तेः। एकत्वादिमतीति तत्र परिशेषात्। एकत्वे एव एकवचनमित्यादिप्रत्ययनियमपक्षेपि नियमस्य सतीपत्वात्परेण न संख्यांतरे एकवच
नादीनां आवर्त्तनेपि संख्यांतरे एकवचनादीनामप्रवर्त्तनात्। नहि एको द्वावित्यादौ एकत्वादिप्रतीतिः रूपैर्वचनमप्रवृत्तेरिति नियंतुं शक्यं। सामान्यतः प्रत्ययनि
यमांगीकारेपि उपस्थितानामर्थानामन्यतमत्यागे मानाभावेन तेषां संभवे एव नियमप्रवृत्तेः। न ह्येकशब्दे द्वित्वबहुत्वयोर्द्विशब्दे एकत्वबहुत्वयोर्वा बहुशब्दे ए
कत्वद्वित्वयोः संभवोस्ति। एवं च प्रथमप्राप्तस्य स्वौजसमौडिति सूत्रस्थानास्येन बाधस्य परमेनुकूलं। अत एवाग्नेयेभ्यः पचतिकल्पमित्यादौ स्वबुसलाप्तेः सिद्धौ
धृनितनचोक्तवचनप्रवृत्तिप्रत्ययार्थाभावप्रातिपदिके एवमवर्त्ततरतिवाच्यं। किंवलप्रत्ययार्थप्रतिपादने केवलप्रकृत्यर्थप्रतिपादने च प्रवृत्तिप्रत्ययपोः प्र
योगौ नेत्यर्थपरभाष्ये केयटहरदत्तादिग्रंथविरोधापत्तेः। फलभूतस्य प्रत्ययपरत्वे भवत्येव सर्थप्रतिपादकपरस्वेतस्य संकोचकल्पने मानाभावाच्चेति निर
स्तं। प्रातिपदिकत्वाभावात्स्वौजसमौडिति सूत्रस्याप्रवृत्तेः। अत एवोक्तवचनमंगीकारेपि नदोषः। प्रवृत्तित्वाभावात्। तत्त्वं तु प्रत्ययविधावुद्देश्यतावच्छेदका
क्रांतत्वात्। अयं च न्यायः शास्त्रबोधितान्यतरप्रयोगविषये। अत एव लिङ्गमिति सर्वादेरन दोषः। तदेतत्फलमभिसंधायाह। अनन्विते ति। इदं च यथान्यासेप्या

वृ.श.र.
१३१
131

वृत्तपदं । व्याख्येतिति पंचकं प्रातिपदिकार्थ इति पक्षे कर्मादीनामपि प्रातिपदिकार्थत्वेन विषयत्वे तु आहृत्नमात्रग्रहणे न कर्तुमशक्यत्वादिति भावः । अपर इति नितानु
वीरः पुरुषइत्यादौ अभेदस्यापि भानेन प्रातिपदिकार्थमात्रत्वाभावात् अर्थभानस्यादिति चेदत्राहुः एकमर्गस्य वाक्यार्थत्वेन बहिरंगत्वात् स्वार्थमात्र निमित्तकप्र
थमाप्रवृत्तसंस्कारबाधानुपपत्तेः नचैवं घटं पश्यतीत्यत्र पुरुषइत्यादौ दोषइति अत आहुः घटस्य कर्मत्वेन गतः इतर विशेषणत्वेनैव विवक्षितत्वात् परसंस्कारबा
लायामपि तत्र विभक्तेः स्वपदार्थत्वात् संबंधेऽत्र त्वदुक्तरीत्या पूर्वं प्रथमायाः प्रवृत्तौ अकरणस्य निर्विषयतापत्तेश्च । अपि च वचनसामर्थ्यात् प्रथमोत्पत्तिः
न च घटो नीलादिरवकाशः तत्रापि बहुत्वस्यातात्पर्ययोऽभेदान्वयस्य सत्त्वात् प्रातिपदिकार्थेति सूत्रस्थमात्रग्रहणेन संबोधने चेति ज्ञापकेन च प्रकरणात् तत्तापद
स्य विशेषापेक्षत्वाच्च विभक्तिना आधिक्ये एवमप्रथमाया वा स्यादेवान्यथा भेदोऽपि गाहौः शिरइत्यादेश्च षष्ठ्यर्थोऽस्त्येवेति वाच्यम् । आधिक्यभेदमादाय तद्दूषणा पाटन
स्यायं तत्वे एकस्मिन्नित्यादौ वाकेरसिद्धत्वादित्यादावत्र तावत् दुर्लभत्वादिति । नन्वेवं तिङ्समानाधिकरणे प्रथमे सेति लक्षणं करिष्यते इति भाष्यवार्त्तिकविरोधइ
ति चेन्न एकविधिनतयोः प्रौढिवादपरत्वात् । तिङ्धः प्रथमैवेति नियमस्य चलकाण्डे रमावकाशस्य देवदत्त पचलर्ई इति स्थिते शतृशानचोर्दुर्वारताप
त्तेश्च । तिङ्समानाधिकरण्याभावादप्रथमैव तिनिप्रमाप्रहत्यावकर्मणि द्वितीयैवेत्याद्यर्थनियमाश्रयणात् सर्वेषां स्वादीनां दुर्वारत्वेन प्रथमामिन्न द्वितीयादिना सम
मानाधिकरण्यमत्वात् । तथा च देवदत्तः पचतीति वाक्ये लायायत्तिः । नन्वकर्मण्येव द्वितीयेत्यादिविभक्तिनियमाश्रयणात् द्वितीयादीनामभावात् दोषइति वाच्यं वि
भक्त्यन्तरनियमानामप्रवृत्तौ शेषत्वान्यायेन षष्ठ्याः दुर्वारत्वात् । एतेन प्रथमासामानाधिकरण्यस्यापि सत्त्वेन प्रसज्यप्रतिषेधाश्रयणेन निषेधो न विषयतीति परास्तं
वाक्यभेदात् असमर्थसमासापत्त्या गौरवापत्तेश्च । जात्यादीनां निरपेक्षं स्वार्थं जात्यादिरूपमित्यन्वयः । जात्यादीति मात्रमान्यत्र पुंसकं घटवृत्ति जात्यादि निरपेक्षमिति कर्मधा राम

१३१

स्यः तत्र निरपेक्षत्वं च विशेष्ये शो निबोध्यं पदाज्ज्ञात्यादिभिर्निरपेक्षमिति तृतीयासमासः व्यक्तिमात्रबोधोपि सर्वतंत्रविरुद्धः सिद्धांत इति। प्राचामिति शेषः। स्वमते तु विशिष्ट
रूपोपादाने एव गौणमुख्यन्यायप्रवृत्तिः। अत एवैकोक्तिस्पष्टा। न्यायामृतेऽरुभयथानुल्लेखेपि प्रवृत्तिपरविशेषप्रदर्शनार्थं तन्मतानुवादः। तुल्यमिति। अत एव द्रोणव्रीहिमा
नपेत्यादौ द्वितीयादिकं सिध्यति। ननु लक्षणायाऽभेदेन द्रोणापरिमितप्रकारकव्रीहिविशेष्यकबोधोपपादनेन प्रयोगसाधनेपि परिच्छेद्यत्वसंबंधेन द्रोणापरिमाणप्रका
रकव्रीहिविशेष्यकबोधार्थं परिमाणग्रहणमावश्यकं। परिमाणादिति स्वस्यावाच्यत्वबोधनात्। किंच सपि: कुडवमित्यादौ समानाधिकरणसमर्थवत्वतीति मि
द्धो नादिमुनिः सामर्थ्यादिइतिषत्वड्लभंड्ति। अत्रेदं प्रतिभाति। परिमाणग्रहणं लिंगं द्विमात्रस्य येनान्यायप्राप्तार्थानुवादस्य कृत्वेनैव सूत्रकारस्याभिप्रेतं। अत एवाभिहिते
प्रथमेत्येतल्लक्षणं करिष्यातउत्तिवार्त्तिककारो निःसंगच्छते। ध्वनितं चेदं प्रकृतलक्षणे भाष्यकारैः श्रास्त इत्यादौ प्रथमाया प्राप्तिरूपदूषणांतरे उपन्यासेनोक्तदूषणानुपन्यासे
न च भाष्यकारैः। एतेन द्रोणशब्दात्परिमाणे प्रथमायां व्रीहिशब्दात्मकमित्वेन द्वितीयायां द्रोणो व्रीहिमानयेति प्रयोगापत्तिरित्यपास्तं। उक्तरीत्या सामर्थ्यानियंत्रितत्वात्।
अत एव संभवत्स्वपहरेतिं पचतीति सूत्रेऽन्वगच्छते। पलन्तु नेष्टमेवेति पूर्वमेव निरूपितमित्यलं तावत्। संबोधने च। संबोधनं ज्ञापनं। अत एव संबोध्यमानो देवद
त्त इति व्यवहारः। तद्ज्ञापनार्थमेव संबोधनविभक्तेः तत्पदप्रवृत्तिवाक्यप्रयोगः तत्फलं प्रवृत्तिनिवृत्त्यादिकं। तत्र भवतीत्युपसर्गोपादानं संप्रयत्नबोधनार्थं। अत एव रा
जा भव पुत्रस्य इन्द्रशत्रुर्वर्धस्वेत्यादौ न संबोधनविभक्तिः इदानीं राजत्वाकरणात् सिद्धत्वेन संबोधनविभक्तेः तत्प्रवृत्तिवाक्यप्रयोगापत्तेन बोधात्। अत एव राजन्
पुत्रस्य राजा भव पुत्रस्य स्वयोर्भवस्येति वप्रयोगः। इदमेवाभिसंधाय संबोधनविभक्तिरनुवादविषयिणी न विधेयविषयिणीति कैयटहरदत्तादयः। हेशब्दादिकं
संबोधनता स्पष्टग्राहकं। अत्र चेतनेनैव गौणः प्रयोगः। सिद्धांत इति। हे देवदत्त त्वं संदाऽहस्यादौ क्रियाकांक्षाशांतये असीत्यस्याध्याहारो भाष्यादिसंमतः। अत एव वि

ऽमर्वेसत्र प्रथमा सिध्यति। अनुवाद्यस्य विधेयाकांक्षत्वेन विधेयस्य क्रियया अभेदान्वयस्य तूपादेयत्वाच्च क्रियान्वय एवोचितः अत एवैकवाक्यत्वसंभवे न कार्यभेदः। एते
नैाम मां पाहीत्यादौ याहीत्यपेक्षार्थेन। अमित्यनेनाभेदान्वय इत्यपास्तं। विभक्तेः साधुत्वार्थकत्वे अभिरार्थकत्वयोरन्यतरापत्तौ संबोधनप्रतीत्सनापत्तेश्च। हे राम देवो गच्छ
तीत्यादौ प्रत्ययार्थानन्वयस्य लक्षणत्वाच्च प्रथमपुरुषापत्तेश्च। एतेन प्रसंगार्थमहं संबुध्यं तस्याभेदेनान्वये भो ब्राह्मणास्त्वं पचेतिप्रयोगापत्तिरिति निरस्तं। किंच
चमर्वे षां ब्राह्मणानां कर्तृत्वे विवक्षितं उत त्वमन्यतमस्येव उत संबोध्यमानानतिरिक्तस्येव। नाद्यः। त्वमिति सेकवचनं ते नो त्वे वा प्रयोगानापत्तेः। न द्वितीयः। अन्ये
षां हायनेषु फलाभावात। क्रियांतरप्रतिपादनेन तात्पर्ये लिङ्घापत्तिः एतेन तृतीयो ऽपि निरस्तः। हे देवदत्त त्वं पचतीत्यादौ संतोष्यमानेकर्तृत्वापादनस्यमयापि कर्त्तुश
क्यत्वात्। शब्दशक्तिस्वाभाव्यात् संबोध्यातिरिक्त एव इदमःशब्दार्थे इति चेन्न हि शब्दशक्तिस्वाभाव्याद्धि निपीड्यमानार्थस्यैवाभिमुखीकरणं हि राम देव दत्त गच्छ
तीत्यादौ वपित्वयानां गंतव्यमित्यादिना त्यय विपर्ययीभूतार्थविनियोज्यमानत्वमस्सैवेतिमयापि सुवचमित्यलमतातावत्त ॥ ॥ इति प्रथमा ॥ ॥ ईप्सितशब्दोऽत्र
क्रियापरः नाभिप्रेतपरीक्षतः। कर्तुरितिकर्तृकालकानन्वयापत्तेः अभीष्टिभीप्सितं स्वर्गं पितं वत्समे प्रियमिति कोशादायुक्तत्वेनाभ्युपसर्गो रहितस्य नरस्थत्वे मा
नाभावाच्च। नत्वाधनीभूतक्रियाया अभावे केवलपदार्थस्याभीप्सितत्वासंभवेनानन्वयापत्तेश्च। एवं तथायुक्तं चानीप्सितमप्हेरीप्सितः वारणार्थानामीप्सित
इतिस्त्रेषु बोध्यस्पष्टं चेदं भाष्यकैयटहरदत्ताद्विग्रंथे तद्भूनपतत्राह। कर्तुरिति। षष्ठीति। ननु कर्तृकर्मणोः कृतीति समस्यस्य चेतस्या पिनद्धितातयोगेप्रवृत्तिनैया
रितिचेन्न। मानाभावात्। स्त्रैणापाञ्च लक्षणासंकोचस्यायुक्तत्वाच्च। एवं कर्मत्रयोः कृतीसस्य चारितार्थ्येन सामर्थ्याभावाच्च। अत एव चलोके तिनिषेधस्य तद्धितांते प्रवृत्तिः।
एतेनोक्तसूत्रस्य तद्धितांते सावकाशत्वेन निषेधस्य भूतनिष्ठायाचारितार्थ्येन राहायतनद्रसारोपरत्वान्निषेधः स्यादितिप्रतेरोक्तमपास्तं। यत्तु कर्मत्वारोनांश एमी

वृत्तिविशेषोपाधिकत्वेन कारकाधिकारस्थककर्मानुमितत्वयोः कृतिसार्थकम्प्रहत्वात् प्रयाणं व्यापारे गोत्वर्थानुकूल्यप्रतीतेः तथा चानुव्यवलंगामीति वक्त्रस्थमानोरमाक्रीडासां
केवलमानाभावेन च विच्छित्त्यनुकूलव्यापारे ताहशस्य धात्वर्थे नियतोपस्थितत्वं नतु ल्लादितिदेवकर्मत्वं भवतीति सूत्रार्थ इति तत्रैव निषेधनयत्राह। विशेषणीभूतेनेति प्र
कारणविशेषेऽपि लीपस्येव नफलेति रितिव्यापारस्येव कर्तृपदे विशेषणात् तथा प्रविष्टत्वेन तस्येव करणत्वेनान्वय इति तदितिभावः। आप्तिश्चात्र व्याप्तिः। आप्तव्याप्तावि
तिस्मरणात्। यथा राज्ञा सेनया ग्रामो व्याप्तः। राजस्वामिकसेनासंयुक्त इत्यर्थः। एवं कर्तृनिष्ठव्यापारजन्यत्वं विच्छित्त्यादीनां न चैवं स्वर्गोपजनिततृप्तिं पचतीत्यादावापत्तिः।
प्रसाए तिस्यायेन धात्वर्थ एवं कर्तृनिष्ठव्यापारजन्यत्वविशेषस्येव ग्रहणात् तात्पर्यात एककर्तृग्रहणं व्यर्थं न च माषेष्वश्वं वध्नातीत्यादिव्याहृत्त्यर्थम्। उक्तरीत्या दोषाभावादित्य
पार्थ। पच्यमानक्रियायाश्च पिकारकविभक्तिप्रयोजकत्वेन भ्रमणाभिप्रायेण प्रयोगे कर्तृग्रहणाभावे दोषोद्धार इति तन्न। कर्तृग्रहणेऽपि दोषस्य दुर्वारत्वात्
एतेन विच्छित्त्यादीनां फलशालित्वाभावात् कर्मत्वं निःसमूहकमित्यपास्तं। न चैवं तण्डुलादीनां कर्मत्वानापत्तिः। तन्मते ग्रहणसामर्थ्येन तथा प्रयुक्तं चानीप्सितमिति
सूत्रबलाच्च धात्वर्थाश्रयस्यापि ग्रहणात्। अत एव लः कर्मणीति सूत्रे संगच्छते। तत्र हि कर्तृसाहचर्येण धात्वर्थस्येव ग्रहणात् स्वर्गादिकं तु न धात्वर्थीभूतम्। नापि
तदाश्रयीभूतकालिकादिसंबंधेनातिव्याप्तिवारणार्थं फलतावच्छेदकसंबंधविशेषग्रहस्यावश्यकत्वात्। पक्षाप्याप्तिश्चात्र कालिकी गदाधरेनाप्तिश्च वा धातुवाच्यक्रि
याद्युत्पत्तिकालेन तदनुकूलव्यापारसत्त्वात् स्वर्गोपजनितत्वं स्यात् उत्पत्तिकालेन फलोत्पत्तिवाच्यव्यापारसत्त्वा।। तोन्को पिदोष इति चेदिति — — — वकर्तृत्वसाधकमिति नोक्तम्। वृ
टं करोतीत्यादौ पतनं पचतीत्यादौ भ्रमतिप्रयत्नव्यतिरिक्तपुरुषेणापि विशेषस्यावगन्तुमशक्यत्वेन मुख्यो त्याघेचारितार्थ्यनादित्वप्रश्यतीत्यादावनापत्तेश्च। तन्त्रास्यपलक्ष्णकूले
पिपतिषतीत्येवं दृष्टं तत्र पिपतिषतीत्यादाविव चेतनाचेतनसाधारणो बोध्यः। तेन काष्ठानि तण्डुलं पचतीत्यादि सिद्धं। तथा चोक्तम् मितियोगविभागादेवेतनेकर्मत्वमित्यपिव

देति। अपायध्रुवमिति। ननु ध्रुवमपायेऽपादानमिति सूत्रे कारकपदानुवृत्तिसामर्थ्यादेव सिद्धे कृतयोगविभागेनेति चेन्न। कारकपदानुवृत्तेर्लोमानाभावात्। अपादानमिति
सूत्रेऽहि विनिगमनाविरहात् पूर्वपरानुवृत्तेरोत्तरकालिकी सामर्थ्याकल्पनेऽपि तैव किं च ध्रुवमपायेऽपादानमिति सूत्रे कारकपदानुवृत्तिः पर्यायार्थस्यात्। न च कारकइति सू
त्रेण महासंज्ञाकरणबलात् क्रियान्वयिनामाक्षेपेणापादानादीनां कारकसंज्ञाविधानसामर्थ्यात् पर्यायसिद्धवत्तद्वृत्तिः समावेशार्थेवमभविष्यति किं योगविभागेनेति वा
च्यं। नटस्य शृणोतीत्यादौ सावकाशत्वात् अपादानमिति सूत्रेऽनुवृत्तौ पर्यायस्तु न। अनुवृत्तिं विनापि प्रथमं वाक्यमात्रान्न सिद्धेः। वस्तुतस्तु कारक इति महासंज्ञाक
रणबलाज्ज्ञापमानसंज्ञापि अपादानादि विषय एवाकारकादन्नश्रुतयोरित्यादौ सरितः अप्रतिज्ञाबलेन तेषामेव ग्रहणमिति स्वर्थे स्याद्वश्यकत्वेनान्यत्र प्रवृत्तौ फला
भावात्। तथा च संज्ञिनामाक्षेपेणावाक्यार्थे वर्त्तनापेक्षयानुवृत्तिर्बलवतीयस्मात् तथा च योगविभागं विनैवाक्षवृत्त्या पर्याये सिद्धे योगविभागकरणमपादानमिति सूत्रे का
रकमिति सम्यानुवाधतलाभार्थमत्र मतियोगविभागे सह विधानेनोद्देश्यविधेयभावेन। नात्वयोनस्यात्। तदेन तदाह पुनरिति। भीत्रार्थानां भयहेतुरित्यादावर्थाधिकारण्य
यणात् समावेशः। क्रियान्वयिनइति। अयंभावः कारकत्वं क्रियान्वयित्वाजनकत्वा। संप्रदानादीनां कारकत्वानापत्तेः। न च योगस्य पूर्ववृत्तित्वाभावेऽप्येवंस्य पूर्ववे
त्तित्वेन तद्द्वारा पूर्ववृत्तित्वमात्रेणायागस्य कारणतावत्तज्ज्ञानस्य पूर्ववृत्तित्वेन कारणत्वमुपपन्नमिति वाच्यम्। ब्राह्मणाय गां ददातीत्यत्र क्रियायाः प्रत्येनपुत्रज्ञानस्य
द्वारा संप्रदानस्यापि पूर्वसत्त्वात्। जनकत्वांशे उक्ता क्रियान्वयित्वविवक्षापाक्षस्य भावाच्च। एतेनाध्यापयिष्यामीति सिद्धिः सिसादौ प्रवृत्तिनिमित्ताभावेपि कर्तृत्वेन साम
र्थ्यादुपसर्जनत्वकर्मप्रवचनीयसंज्ञयोः प्रवृत्तिस्तथा कारकसंज्ञाया अपि कर्मादिप्रवृत्तिरित्यपास्तम्। न चैवमपि ब्राह्मणस्य कर्मसंज्ञा दुर्वारा। पुत्रद्वारा तस्यापि क्रि राम
यान्वयित्वात्। न च सर्वाश्रयात् क्रियान्वयित्वमेव विवक्षणीयमिति वाच्यं। कर्मकारकस्य फलद्वाराऽधिकरणकारकस्य कर्तृकर्मद्वारा क्रियान्वयस्यानुभवसिद्धत्वादिसमत १३३

स्य विनाप्रमाणमपलापायोगात् । ग्रामं गच्छतीत्यत्र ग्रामे गच्छतीति प्रयोगयोः तत्प्रकारं विनोपपादनासंभवाच्चेति वाच्यं । क्रियायाः कारकाकांक्षितत्वेन कारकाणां क्रियाकां
क्षितत्वेन तत्प्रकारं पर्यायान्वयस्यावश्यकत्वेपि षष्ठ्यर्थस्थले तादृशाकल्पने मानाभावात् । फलस्यापि क्रियात्वाच्च । अत्र क्रियान्वयस्य प्रकारत्वेनैवेति नाग्रहः । किंतु
विशेष्यत्वेनापि । अत एव पाचकस्य देवदत्तस्य गेहे देवदत्तेन पक्वस्य तंडुलस्य समूहः इत्यादौ यागाद् क्रियानिरूपितं कर्तृत्वादिकं संगच्छते । ब्राह्मणपुत्रमिति । सुंदरविशिष्ट
पुत्रस्य क्रियाव्याप्यत्वेन सुंदरादीनां कर्मत्ववद् ब्राह्मणस्यापि कर्मत्वापत्तिः । तन्मते तु अनुरूपाधिकरणविभक्त्या सुंदरादीनां क्रियान्वयात् कर्मत्वं । ब्राह्मणस्य तु न । पच्चाद्यकथि
तं चेति । तत्त्रेणापि थिरूपकर्मयोगे न पुत्रस्येव पुत्रस्य कर्मयोगे न ब्राह्मणस्यापि कर्मत्वापत्तिः । पुत्रशब्दे नञ्जन्यत्वा शक्यापि वेधना ब्राह्मणस्य विश्लेषाश्रयत्वे न ध्रु
वमपायेऽपादानमिति संज्ञापत्तिः । नन्वेवमिन्यक्षेमसमप्यनुपपन्नमेतत्सत आह । पचेतीत्यर्थ इति । अत एव पदार्थयोर्न विरोधः । कर्मणि पदैकत्वमिति । शेषषष्ठी तिस्र
त्रे संबंधेषु एकत्वमित्यादिरर्थः । समानपदोपात्तत्वेनेह तृतीयादिविभक्त्यर्थ एवान्वयस्य युक्तत्वात् न च एवं तत्र षष्ठ्याः कर्मत्वसंख्यासंबंधानेकत्वेन बहुत्वं च नायत्तिः ।
एकस्य बहुषु संबंधयुगपच्छष्ठ्यन्वयासंभवेनानन्वयापत्तेः । अत एवात्र वृत्तावित्यन्वयः प्रज्ञोः केवल इत्यादौ प्रतियोगिभेदात् संबंधानेकत्वस्य एकमेवेति केचित् । परे तु
षष्ठी विषयिप्रकृत्यर्थ एव संख्यान्वयमात्रं तु आख्यातसंख्याविभक्त्यर्थ इति पक्षेपि एकत्वादयो विशेष्याः । कर्मणि यदेकत्वमित्यादि न तु एकत्वविशिष्टकर्मणीत्यादि तथा
सति विशिष्यभूतकर्मत्वादीनामुक्तत्वात् अनभिहिताधिकारीयं तृतीयेवमस्यादि इत्यनन्वय एकादिशब्देभ्यो द्वितीयादीनामनापत्तेः । विशेषणीभूतकर्मत्वादीनामनभिधानाद् द्वि
तीयाद्युत्पत्त्याश्रयणात् तु कर्मादीनां विशेष्यत्वेपि संख्यायाश्च अनभिधानात् द्विकाणामविक्ष्यत इत्यादौ दोषो दुर्वारः इति ध्येयं । मूलस्य तु संख्याप्रतिपादनमात्रेनासमर्थं न तु
विशेष्यत्वोपवर्णनपरत्वेन एकमित्यादौ कारकमात्रे विभक्तेरुत्पादात् विशेषणविशेष्यभावे विनिगमकाभावात् तत्ख्यानानापार्थक्ये न च शेषषष्ठीस्त्रेवेशिष्ट्यासंभवा

वृ.श.ए.
१३४
134

चसंख्याकर्मादौ भिन्नैव शक्तिः। कर्त्रेकः कटइत्यादिनतु कृत्यानां कर्त्तरीति सूत्रेणेति ध्यावतं गावः कृष्णो नित्याद्यर्थंहृसानाति नियोगं विभज्य नेनिचानवस्मे निषेधपाल्ल
स्यावश्यकत्वेन प्रवृत्ते षष्ठ्यभावस्य पपादइति चेन्न। मम मया वा सव्यो हरिरित्यत्रापि निषेधस्य दुर्वारत्वेन निषेधविकल्पयोर्व्यवस्थानापत्तेः। नच निषेधवाक्ये उभय
प्राप्ता विभाषेयं तस्या निवृत्ताः। अनभिहिताधिकाराभावेन सर्वत्रापि उभयप्राप्तत्वात्। नचाकर्मकधातुयोग एव विकल्पः इति वाच्यं। कर्त्तरि स्वस्यैव प्रयोज्यापत्तेः। तद्धि
कर्त्रेकर्मणोः सत्तुकृत्यो कर्मणि नियमार्थम्। नचाकर्मणि निषेधः कर्त्तरि विकल्पः। नचकर्मणि गाणकर्मणि वैषतः स्यनेन विकल्पस्य सिद्धत्वात् निषेधो व्यर्थ इति
वाच्यं। होऽधमागावः पयः कृष्णो नेत्यादौ च ऐतार्थत्वादिति वाच्यं। कृत्यानां कर्त्तरीत्येकं सूत्रं विधाय निषेधानन्तरं त्याएकदेशे स्वरितानुत्वाधिकारत्वेनेनेव नियम
सपादनेनेष्टसिद्धौ निषेधानन्तरं साध्यत्वामा नेनकर्त्तृपि निषेधस्याधिनित्यत्वात्। तेःप्रमाणकमकोच स्यात्मप्यत्वाद्याहृतीतिवरैकंद्वचन निर्देशे कर्त्रेव्येव कु
वचननिर्देशेनानकविधिविकल्पनपासर्वत्र षष्ठ्यावाधाच्च। अतएवोक्तोदाहरणे कृष्णो नेत्यत्र कर्त्तरि चेत्यनेनापि सिद्धं तेषष्ठीनां। नचोभयप्राप्ताविति नियमेननित्या
ऽकर्मणि षष्ठीविधिमुखेन तत्प्राप्तेर्बोधनेन तद्ग्रहणेः विकल्पेन वाधाच्च पिननाप्रा त्रियायिनमध्यपवादन्यायेन वाभयप्राप्ताविति नेन कर्त्तृकर्मणोः कृती
त्यस्येव वाधाच्च। एतेन केचिद् विशेषणोविभाषा सिद्धेतीत्यनेन सर्वत्रैव विकल्पसम्प्राप्तौ। तेन विकल्पव्यवस्थानापत्तिरिति परास्तम् तृत्यातिरिक्तविषयक
त्वात् रेवदत्तस्य हतरिहतइति न्यायेन प्रथमायाः प्राप्त्यापत्तेश्च। कारकमिति। कारकमात्रमित्यर्थः। एवमवनिभावनेनवे विशेष्यत्वमर्थइति वैयाकरणाभूष
णे पितृ ब्रचरणाः। पक्षस्तंडुलइत्यादौ कर्मप्रसयपसमभिव्याहारे फलव्यापारयोर्व्यापारस्य योधनस्यावश्यकत्वेन कर्म ध्यातफलविशेष्यकाबोधः। अतएव सर्वत्र ले
तस प्रत्ययार्थे प्रकृत्यर्थविशेषणत्वपितस्यनत्यागः। तच्चान्वपित्वविशेष्यत्वेन विशेषणत्वेनवेत्यन्यदेतत्। एतेन कर्त्तृलकारेफलविशेष्यकबोधएवाह्वित्यय एमे
१३४

त्तं। अत एवं देवदत्तेन पक्व इष्यत इत्यर्थे पुत्रीयतीतिवत्प्रयोगः। भिन्नार्थत्वात्। किंतु तत्र मिच्छतीति तस्मिन्नर्थे एवेति भाष्यकैयटादिग्रंथाः संगच्छंते। अत एवायं च कृत्स्नः पच
त इत्यादौ कर्मभेदेन कर्तृत्वस्य ज्ञापकः। अभ्यावृत्तिशब्दस्य सदृशोत्पत्तिगणनायामेव प्रयोगः इत्यस्य सर्वस्यमाणत्वात्। आश्रयभेदेन तद्भेदात्। न चैवं फलेकालान्वयः स्यादि
ति वाच्यम्। क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिके निवाक्समरीयो कारीसाऽस्यत्रान्वयासंभवात्। वर्तमाने लट् इत्यादौ धातोरित्यनुवर्तनात्तस्य क्रियावाचक
गमिति तेन फलं स्यात् उपस्थितत्वात् क्रियावर्तमानत्वादावेव लडादिविधानाच्च। दक्षितं तत्पाटशीभावनाख्यातोधात्वर्थश्चापि पाटहशः। नामेति तेन वहूपेणाकथ
तयरः कृदिति निरहर्यादौ कर्तृत्वधातुसंज्ञासूत्रस्थभाष्यादिस्वारस्येन च सम्यग्भावस्य मानाधिकरण्यात् विक्लितिपूत्कारादयो धातुवाच्याः तथा च विक्लित्यादीना
क्रियात्वेपि न बाधकं। एतेन फलेन व्यांगीकारे व्यापारायगमे कालांतरे विक्लित्तिः स्यात् तेन पचतीति प्रयोगापत्तिरित्यपास्तं। तादृशविक्लित्तेर्धात्वावाच्यत्वात्। एतेन प
कस्तण्डुल इत्यादौ आश्रयस्य विशेष्यत्वेन फलेन पचतीति प्रयोगापत्तिरित्यपास्तं। तादृशविक्लि(त्ते) न्वयः कालस्य तु व्यापार एवेत्यपास्तं। अत एव न क्रियाप्राधान्यमाख्या
तमिति सिद्धांतविरोधः क्रियाशब्देन भावकर्मणोरुभयोरभिधानाच्च। एवं च एवमेवेति मत्वा ग्रंथे धात्वर्थ एव विशेष्य इत्यभिप्रायेणोक्तं व्याख्येयं इति मनोरमा
विलासमकुरुत्पत्तिः। भावलकारे तु भावे नैव विशेष्याभावार्थे कर्तृत्वप्रत्ययादौ सामानाधिकरण्यसंबंधेन क्रियायां नामार्थस्य क्रियायामन्वयेन धातोरकर्मकतः
आयाः विशेष्यकफलप्रकारकतोधजनकत्वस्य कृत्तस्विनतेत्वत्यागे मानाभावात्। ननु वक्ष्यमाणोदाहरणे क्रियायाः क्रियान्तरं प्रति विशेषणत्वेन सिद्धांतोऽयुक्त एवेत्या
शंक्याह। धातूपस्थितस्यापि अयं भावः। आख्यायते नैव प्रधानीभूतार्थोऽनेनेति व्युत्पत्त्या आख्यातशब्देन धातुरुच्यते। नाम नाम्नातोपसर्गनिपाता इति भाष्ये तिङन्तस्य प्र
कृतीनामभिवोद्देशाच्च। अन्येपि तत्र नामाख्यातजानीति शाकटायनो नैरुक्तसमयश्चेत्युक्तत्वाच्च। न हि मत्पक्षेनामस्तु भाष्यते। किंतु धातुजं। अत एवैतत्समानार्थ

कंत्वात्कं सर्वनामधातुजमाहेति एतेन व्याकरणोऽत्राकर्तृस्य च तोकमिति महाभाष्ये पठितं । अत एवैधातुक्कारस्यापाठावमंतस्य क्रियाविशेष्यकबोधजनकत्वात् । तत्र
प्राधान्यं ये क्रियान्वयितया प्रमाणान्तरेण निर्णीतास्तान्यपि । तथाच लाघवात् कारकप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति धातुजन्योपस्थितेः कारणत्वस्य क्लृप्त-
त्वेन कर्मादिकमपि धात्वर्थं प्रति विशेषणं । पचथुक्त वचनेन देवदत्तेन काष्ठैः पक्वस्तण्डुल इत्यादौ देवदत्तादीनामिव तण्डुलस्यापि क्रियां प्रति विशेषणत्वं प्रसक्तं
तथापि तदृतेरवचनेन सत्त्वप्रधानानि नामानि इत्यनेन प्रत्ययार्थविशेष्यता बोध्या । तत्र च प्रसासन्नित्यायेन सत्त्ववाचकप्रत्ययान्तं नामाख्यायते । अत एव पचति
कल्पमित्यादौ न दोषः । एतेन धात्वित्यादेरप्रत्ययार्थत्वात् तत्र विशेष्यकबोधाय तेषां लिंगसंख्याकारकान्वयात् प्रत्ययोक्तिः संगतिस्यात्तां । शब्दाध्याहारवादे इति ।
शब्दज्ञानादेवार्थबोध इत्यर्थः । तत्र शब्दांशे उपनीतभानं मानसं प्रसक्तमनुमित्यात्मकं वेसम्प्रेतत् । अर्थाध्याहारवादे इति । अत एव ल्यब्लोपे पंचमीत्यादिसंगच्छ-
ते प्रयोगो लिंगिति । तथाच शब्दाध्याहारवादेपि परजन्यपदार्थोपस्थितेः सत्त्वेन प्रकारत्वमेव स्यादिति भावः । दृष्टपर्यायत्वादिति । तथाच पश्यप्रमृगो धावतीत्यादिवाक्ये
विलोपापत्तिः । न च वाच्यं निर्भेदप्रथम इति वाच्यम् । तादृशवचनस्य पाणिनीयशास्त्रभावेन क्रियाविशेष्यकबोधानुभवानुमानात् । स्पष्टतया भवादिसूत्राद्धाव-
भिहितत्वाच्च [redacted] अत एव पश्य मृगो धावतिकर्म्मादर्शने मृगो धावतिकर्मस्य तादृशसंगच्छते । एतेन विशिष्टवाक्यार्थस्य कर्मत्वे पितृबोधकवाक्यस्याप्रातिप-
दिकत्वात्तस्य मांतविशेष्यकबोधेपि द्वितीयापत्तिः । मृगो धावन् रसत्ययेत्विशेषापत्तिरितिमंदस्य तारणाम पास्तम् । विशिष्टस्यानतिरिक्तत्वेन विशिष्टस्य कर्मत्वे पि विशे-
षणविशेष्ययोः फलाश्रयत्वेन तद्दर्शने तात्पर्याच्च विशेषणविशेष्ययोः सत्त्वस्य वा इति सूत्रभाष्याननः क्वजि तिसूत्रेष्य भाष्ये ध्वनितत्वाच्च एतत्तरं चैतत् । अन्य- राम
थापहरणयापिंगाक्ष्येत्यादावपि एकैकत्वे बोधमुपयानापत्तेः । पार्ष्णिकान्वयस्य वेदतात्पर्यकत्वे एकं विभक्त्यनापत्तेः । वेदतात्पर्यकत्वे तु क्तदोषो वक्त्रलेपापत्तेः ।

।विशेष्यतात्प्रकारताभिरिक्तविशिष्टनिष्ठविषयताकल्पने मानाभावाच्च नीलरूपविशिष्टं घटं जानामीत्यादौ घटादिपदोत्तरं द्वितीयानापत्तेश्च उत्कटधावनक्रिया
विशेषस्यैव दर्शनकर्मत्वान्वयस्य प्रतिपिपादयिषितत्वेन तदसंभवाच्च। पश्य मृगो धावतीत्यादौ धावतीति तं पश्येत्यादिवाक्यार्थे वैलक्षण्यापत्तेश्च। एतेन मृगो धा
वतीति तं पश्येत्यादिवाक्यस्य बोधकारणतायाः आवश्यकत्वे पश्य मृगो धावतीतिवाक्यस्य कारणत्वकल्पने गौरवात् क्षिपयास्त एकविषयत्वाभावेनेलाघवं गौर
वं तर्कीनवनाऽऽपाच्च। भाष्यवार्त्तिकेति एहं चुलटः शतृशानचौ। प्रथमायां रूपवित्यादिसूत्रस्थभाष्यादौ स्पष्टम्। अत एव भावाख्याते आख्यातार्थप्रकार
कधात्वर्थे विशेष्यकबोधे धात्वाख्यातजन्योपस्थितिः कारणमिति क्लृप्तकार्यकारणभावस्य कर्तृकर्माख्यातेन व्यभिचारः। व्युत्पत्त्यन्तरकल्पना च न। अत एव
चकोरदृशः तुलद्गति प्रश्ने पक्वान्न तुलद्गति वस्यन्ते तन्तुलद्गति नोत्तरौ। अत एव पचतिकल्पः। पचतः कल्पौ पचन्तिकल्पा इत्यादिकं न। किंतु पचतिकल्पं पचतः
कल्पं पचन्तिकल्पमित्यादिकमेवाख्यातार्थादिति। बाधस्य व्युत्पत्त्यसमाश्रित्वात्। अत एव वृद्धः कर्मत्वमानेपन्नं कृतिरितिवाच्य विपरीतव्युत्पत्त्यन्तरस्य न निराकांक्षा
मितिशास्त्रकृतां व्यवहारः। स्यादेतत्। रूपाणामेवत्वं तथायोयातमुक्तेवत्तमानयीते सादौ कर्तृकर्मेतरकारकान्वयोऽस्त्येव। किं च पचतिकल्पं पश्य पचतिरूपं
पश्येत्यादौ पदार्थत्वेन प्रकारताभ्युपगमेऽपि सत्वेनेष्टमिति स्पष्टं भाष्यादौ। किं च तेयैन तुल्यं क्रियाचेद्वतिरिति सूत्रेणोपमीयते यत्तदुपमीयते पश्चात्तयोः साधार
णधर्म एतत्त्रितयमपेक्ष्य उपमेयोपमानभावः प्रवर्तते तत्र यत्र क्रियोपमानत्वेन तत्रासावश्यापेक्षसाधारणधर्मोधारत्वात् क्रियारूपतां हित्वा सत्वरूपतां प्रतिप
द्यत इत्यादिभाष्यार्थप्रतिपादकैः घटहरस्त्रादौ त्याख्यातोपात्तक्रियायाः सर्वैरेव सत्वदुर्वारप्रसंगात् द्वितीयापत्तौ त्यादौ तु नैवमिति न क्रियात्वादिसत्वहानिः। प्रातिक
पकृत्वाद्यभावेन तृतीयाद्यप्राप्तेः। न च रोदितीत्याख्यातार्थोऽपि श्यपाद्वार्थस्य विशेष्यत्वभावप्रधानमाख्यातमिति वचनविरोध इति वाच्यम्। स्वार्थे स्यास सत्वरूपत्वेन विशे

वृ. रा. टी.
१३६
136

रोदितीव पठतीत्यादौ क्रियायो रूपमेयोपमानभावस्यसत्वात् । तचायं कर्त्रीरियोपमानोपमेयभावास्ति निवाच्यं । विनाप्रमाणं अनुभवापलापस्याप्रयोजकत्वात् ।
रोदकर्वपाठकः रोदितीव पटतीत्यत्र योर्वैलक्षण्यमावापन्नेश्च । एतेनप्रत्युक्तं । मिवशब्दश्रवणेन धात्वर्थयो रूपमानोपमेयभावो दुर्लभ इत्यपास्तं । तिङ्न्तोत्त
र मिवशब्दश्रवणेन तदर्थयो रूपमानोपमेयभावस्य सुलभत्वात् । तदर्थस्य विशेष्यत्वेन क्रियैव । अत एव वामनसूत्रे विवेचनं एवं पदार्थयो रूपमानोपमेय
भावमतीतिः । किंचैवंवादीनामन्यत्रापि दृश्यते उद्बाहुरिव वामनः प्रसृतिवच्चकाकमिसादोपथा । अकचरतिङ्न्तकर्त्रीपद्युपमानस्यन्यामतोऽसौ क्रियाप
देच्यक्रियासाधनव्यग्रेनालमध्यापेक्षितुमितिथं । अपि च तिङः तिङन्तस्य तिङन्तस्थात्वानपरभाष्यविरोधः । उक्तरीत्या समानवाक्ये तिङ्द्व
यस्यलाभेन न ग्राह्यत्वं तस्यावश्यकत्वात् । किंच पचति कल्पं देवदत्तइत्यादौ भेदेनान्वयो वक्तुमशक्यः समानविभक्तिकत्वाद्धि रूढविभक्तिएहित्याद्येत्याशं
क्याह अन्यत्र विस्तरइति । अपमर्थः । सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपकल्पते इति न्यायेनोत्तरकालिकरणत्वबोधिपिशाच्चबोधिकरणत्वं देवभाना
त्वर्थकर्मपदेन क्रियाधारकारकोपलक्षणाद्धेतुत्वस्याकारकत्वाच्चनात्र दोषः । स्ववाचकोत्तरद्वितीयादिप्रतिपाद्यकर्मत्वादिप्रकारतानभ्युपगमाच्च । तेन न तुल्यमि
तिसूत्रस्थस्यैकेय्यदादीनां त्वयमाशयः । राजशयितुल्यं न तुल्यं देवदत्तेन शयितं स्यात् न तुल्यं गमनं मेदत्वादित्यादावुपमानार्थस्य न क्रियात्वं । तृतीयान्तादृ तेर्वि
धानेन तुल्ययोगे तृतीयापार्थवीरत्वाच्च । नामार्थयो विभक्त्यर्थं मद्द्वारिक्तस्य भेदेन संबन्धेनान्वयस्यायुक्तत्वात् विभक्त्यर्थान्वयस्य द्वारत्वेन राजशयितव्या
द्रागतइत्यादौ कालवपक्षस्यत्वाच्च । ब्राह्मणादिमहत्त्वरीतावध्ययनादौ ब्राह्मणादिपदानां लक्षणायामपि निरूपितएत्यानक्रियात्वं । भूते एवं गत्या क्रियात्वेऽग्रहेणा तुम
र्वैवर्द्धितिमस्य पदनितर्नैवस्यष्टं रोदितीव पठतीत्यादौ तु नैवमिति न क्रियात्वासत्वहानिः । प्रातिकल्पकत्वाद्यभावेन तृतीयाद्यप्राप्तेः । नच रोदितीत्याख्यातार्थोप एमं

१३६

क्षपाद्यर्थस्य विशेष्यत्वे भावप्रधानमाख्यातमिति वचनविरोध इति वाच्यं द्व्यर्थस्यासत्त्वरूपत्वेन विशेष्यत्वबाधकाभावात् । उक्तवचनेन सत्त्वार्थकं प्रति
विशेष्यत्वबोधनात् । अत एवाख्याततिङन्तक्रिययोः परस्परं विशेषणविशेष्यभावः । अत एव न पचति चैत्रः पचत्येवापमित्यादौ भावनाया असत्त्वार्थेऽन्वये
पि न दोषः । द्योतकत्वदिशा बृहतां द्योतकत्वाङ्गीकारे तु दोषशंकैव न । अत एव रोदिति तुल्यं पठतीति वाक्यं लोके न प्रयुज्यते तुल्यशब्दस्य सत्त्वार्थकत्वेन क्रियां प्रति वि
शेष्यत्वासंभवात् । विभक्त्यर्थद्वारेण धात्वर्थनामार्थयोः संबंधस्याव्युत्पन्नत्वाच्च । अत एव रोदिति कल्पेन तुल्यं पठतीति वाक्यं न । ध्वनितं चेदं भाष्ये सन्वि
धायकसूत्रस्थभाष्ये तुल्येप्यवादिति । भाष्यकारमतेऽपि पश्य मृगो धावतीत्यादौ कर्तृकर्मकारकान्वयपि सर्वनामपरामर्शयोग्यत्वमसत्त्वामित्यादिल
क्षणानामसत्त्वेन कृत्यभावाच्च । न हि कार्यानिमित्तत्वेनाश्रीयत इत्यभिप्रायात् । तिङ्भिन्नमेव पदं निमित्तत्वेन गृह्यत इति न दोषः । किं च पश्य मृगो धावतीत्या
दौ लोडादयोरपि प्रमिचरितत्वेन बोधप्रतिबन्धाभिव्यक्तिवस्यैव नियामकत्वात् । किं च प्रथमान्तस्य न भावनायामन्वयः समानपदोपात्तत्वस्य प्रत्ययार्थान्वयेन
नियामकत्वात् । किं त्वाश्रयस्य विशेषाकांक्षायाः सत्त्वेनाख्यातोपात्ताश्रये तस्य तु नामार्थत्वं भावनां प्रति विशेषणत्वात् । ध्वनितं चेदं तिङ्समानाधिकरणे प्र
थमसामर्थ्यविवक्षितस्य वार्त्तिककारस्य ग्रन्थे । यत्तु क्रियाविशेष्यकबोधे उद्देश्यविधेयभावानुपपत्तिरिति । तत्रानिर्हेतुकमाख्यातमिति । विशेषणस्येणाश्रयस्य पदान्तरो
पादानेन तात्पर्यवशात् स्वरूपपत्तेश्चैव सत्त्वाद्वितीयोऽनन्तेरिति । अप्रधाने क्रियानिमित्तानामभिहितत्वमादाय प्रथमो सत्त्वे विभिन्नविभक्तित्वादभेदान्वयानापत्त्या
नभिहितत्वस्यैवानापत्तिः । तथा चात्र नियत एव प्रयोग इति भावः । तदेव ध्वनयन्नाह यत्र कारकप्रयुज्यते रसाश्रविति । आदिपदग्राह्यं तु पक्वान्नयोरन्तरोटिकाः भुज्यत
इति बोधप्रमानयुगपदिति । जनितान्वयबोधे नैराकांक्ष्यात् । किं च ओदनं इति प्रथमान्तस्य कर्मतासंसर्गेण धात्वर्थान्वयोऽव्युत्पन्नः । नामार्थप्रकारक

वृ.श.१.
१३७
137

धात्वर्थविशेष्यकबोधे भेदेन संबंधेन विभक्त्यर्थोपस्थितेः कारणतायाः सर्वतं[?]त्रसिद्धत्वात् । कर्मणि द्वितीयेत्यादिना आधेयत्वबोधनाच्च । द्वितीयांतस्य भुज्य
तद्वृत्तिक्रियान्वयादर्शनाच्च स्वमेव । तन्त्वं मया भुक्त्वा ग्रामं जामीति प्रयोगापत्तिः । त्वां तेन शाब्दान्वयविवक्षायां क्त्वाप्रत्ययस्य कर्त्रैवाच्यत्वेनानुक्तत्वेन तृती
याद्युत्पत्त्यादिति चेदत्रोच्यते । क्त्वाप्रत्ययार्थक्रियायाः समानाधिकरण्यसंबंधेन प्रधानक्रियायामन्वयः । तत्र क्त्वाप्रत्ययस्य तात्पर्यग्राहकत्वमिति सु
त्वान्तक्रियायाः समानाधिकरण्यसंबंधेन प्रधानक्रियायामन्वयः । तत्र क्त्वाप्रत्ययस्य तात्पर्यग्राहकत्वमिति सहत्र वार्त्तिकभाष्यादिसंमते युक्तिसिद्धत्वा
तिनावत्रिविधादृ । एवं च भुधानुपपत्त्यापत्तिः एकप्रत्ययस्यैव कर्तृत्वेन क्त्वाप्रत्ययस्य प्रधानक्रियायाः कर्तृशेषार्थस्य नाकांक्षायामभावात् । अन्वयाभावेन प्रधानक्रिया
याधेयविभक्तिः । कर्मादौ तु धात्वर्थे नाकांक्षायां स्वेच्छया मया भुक्त्वा गृहं व्रजामीति प्रयोगोऽप्यत एव नाश्चासादुनिष्टामलिसारिस्तत्रत्यभाष्यादिस्वरसोप्येवमेव । एतेन सर्व
त्रैव विवक्षाभेदेन प्रयोगद्वयोपपत्तौ गृहं हरिं गत्वा निर्विघ्नपद एवेति शंकापि समाहिता त्वतस्तत्रौदनं पक्त्वा भुज्यत इत्यत्र वैयर्थ्येनौदनपक्त्वा भुज्यत इत्यादि मैवत्येवाप
ह्यानुपपन्नदानहृदुक्त्वापि प्रतीयत इति हरिकारिकयोक्तप्रयुक्तकार्यबोध्यते । ननु स्वनिष्ठानुक्तप्रयुक्तकार्यमावृत्तिः वनितद्वितवाक्येन तादृशार्थस्य वबोधनात्
। एवं च क्त्वाप्रत्ययस्य कर्तृवाचकत्वेऽपीदृशप्रयोगानापत्तिरिति दोषो वाच्यः । वस्तुतस्तत्र न्यायाभासः तत्त्वकत्वेन हरियं यस्य भाष्यग्रंथान्यमिवा शुद्धत्वेन तस्य त्यभावः
हरिं पूजयितुं धनं स्तोत्यादौ हरिपदार्थविधेयपितामहचरणोक्तेरेव शरणं कर्तृत्वत्वात्तादृशस्य नित्युपपिव्याप्तः । पूजयितुं शक्य इति । शकादरत्यत्र पूजयितुं ह
रिस्तु भयं कर्म । अत एव जिगमिषितव्यो ग्रामः इत्यादौ ग्रामादि कर्मणि कृत्यादयः । न च हरिः स्वेन ह्रेपशक्यः । किंतु पूजनत्वेनेति पूजनं प्रत्येव हरेः कर्मत्वं तस्यैव । अत ए
व ग्रामं गंतुं शक्यत इति सिद्धं त्यथर्थकर्मणि लिचतुर्थीविधानात् । शक्यप्रत्यन्वयप्रत्ययविशिष्टस्यैवेशा ध्ध्य विशेषो विशेषणं तत्रैव विशेषणांतरे इति बोध्यं । एवं १३७

ध्वनितं चेदं पस्पशायां भाष्यकैय्यटयोः । इदं च सन्निधायकसत्त्वे कोलाहलो । एवं विवक्षाभेदेन ग्रामो गंतुं शक्यते ग्रामाय गंतुं शक्य इति प्रयोगद्वयं बोध्यं । अथ फलितं । एवं जिग-
मिषितो ग्रामः इत्यत्रापि साधु । तस्येति । नन्वेवं फलविशेषणीभूतोक्तपचतीत्यादौ द्वितीया न स्यात् धात्वनुपात्तफलस्योक्तत्वात् । किं च गुरुणा वटः कृत इत्यादाविव सुंदरं वटं करोती-
त्यादावपि विशेषणे द्वितीया न स्यात् विशेष्यो[redacted]त्यत्र द्वितीयैव कर्मत्वस्योक्तत्वादिति चेन्न धातुना वि-
क्लिन्नत्वादिरूपेण विक्लित्तेरु[redacted]क्तत्वेपि ग्रामपदेन रूपेणानुक्तत्वाद्वितीयादुर्वारा । अत एव तंडुलं पचतीत्यादौ द्वितीया । अत्र मञ्जूषापालनं
न दोषावहमिति वाच्यं । कृतः कट इत्यादौ दोषापत्तेः । न चैवं विक्लित्त्यादिकर्मणि लकारोपि स्यादिति वाच्यम् । कर्तृसाहचर्येण धात्वर्थस्यैव ग्रहणात् । द्वितीयान(
त्पत्तौ समानविभक्तिकत्वाभावेन विशेषणविशेष्यभावस्यैवानवगमेनाभिहितत्वेपि समत्वात् । किंच मत्यर्थनामकूसर्थान्वितस्वार्थबोधकत्वमिति सुसत्वाबद्-
त्व विशिष्टवटस्य कर्मत्वोक्तावपि सोद्यैरादिविशिष्टस्य कर्मत्वानुक्तेस्तेन रूपेण पदेभ्यो द्वितीयादीनां दुर्वारत्वम् । कृत्यत्र सुपस्तु न मञ्जूषार्थस्य कर्मता भावश्चेत् किं-
तु सक्तूसंर्थप्रतिपदस्य कर्मभावः । सत्त्वोभयोरपि । अत एव सर्वव्यापकाकारकत्वाविशेषणत्वविनिगमनाविरहाद्भावनायामन्वयः । तस्माद्विशेषणविशेष्ययोः समा-
नविभक्तिकत्वमेव युक्तम् । तथैवात्रीप्सितमिति । अनीप्सितग्रहणं तद्भिन्नबोधकं । तेन दुग्धां हासीनयोः संग्रहः । फलशालि कर्मेति । न चैवं विक्लित्त्यादेः कर्मत्वं न
स्यादिति वाच्यं । फलव्यापारयोर्जन्यजनकभावेनान्वयाज्जन्यत्वरूपफलस्य तत्र सत्त्वात् । संसर्गस्यापि धातूपस्थाप्यत्वाद्धातूपस्थाप्यत्वपदार्थविषयेवेति नाग्रहः ।
धातुमात्रोपस्थाप्यत्वमिति विवक्षया तस्यैव पचतीत्यादिनेति बोध्यं । न च दुष्टं जानामीत्यादौ न दुष्टस्य विषयतारूपफलशालित्वमस्त्येव । तत्कोपवेदोषमु-
पगमितं न दोषशंका । इदं च पथाम्नायेप्याशयकं । वारणार्थानामिति । वारणं प्रवृत्तिविघ्नः । विभागानुकूलव्यापारो वा । न च कूपादंधं वारयतीत्यादौ कूपादेरपाद-

ह॰ शा॰ र॰

१३८

138

नत्वं न स्यात् । वा रपि तु वोपमानस्य वा न भिमेन त्वादिति वाच्यं । इष्टसाधनताशब्दस्य योगिकस्यैव यथार्थ्य ग्रहणात् । वयं तु प्राग पश्येत्त्रं धादेरेव वा इप्सित निष्ठव्यापारजन्यमहत्तशाल्प
त्रपूलशालित्वेनेप्सितत्वं तथापि संकोचे मानाभावेन वा रणाश्च वा अकोटोपहले रपि प्रवृत्तित्वेन वा प्रमाणानि निष्ठगमनव्यापारजन्यफलशालित्वे नैकूपदे रपीप्सित
त्वं बोध्यं । द्वितीयप्रभृतु विभागस्योभयनिष्ठत्वात् इप्सितनिष्ठव्यापारजन्यफलशालित्वकर्मयोः स्पष्टमेव । तं योगस्यैवाभावान्नि हृ विभाग परिपालनमात्रेणाफलते तिवो
ध्या । अत एव मुख्यापापस्याभावो द्वारणार्थो नामितिसूत्रारंभः । प्राप्नोतीति अपवारत्वेनेति भावः । तत्रोपापेति । परत्वेनेति शेषः । इष्टितममितीति । ईप्सितशब्दो योगि
क इति तावन्निर्विवादं । तत्रैवातिशयोपमेव प्रसूर्वमिच्छाविषयीभूतत्वं क्रियायां फलेच्छापूर्वकेच्छाविषयः फलं विष्टतमानि क्रियाविष्टत्वेन तं दुलादिकमपि तत्वकर्तृ । ईप्सितत
ममितिसूत्रे कर्तुरीप्सितमानात्मकर्तृ धात्वर्थव्यापारस्यैव केनेत्याकांक्षायां पूर्वोक्तौ सान्वयपादस्य मकृतधात्वर्थव्यापाराश्रयमकृतसुदेश्य स्यमानवकारेवेप्सिततम
त्वं । अत एव गोलोकर्म गोदुग्धादिरिसादिकं संगच्छते । न चैवं क्रमो नवकं वारपत्रिपपयसोरनेभुक्तरस्यादावेवमतियोगस्त्वेन कर्मसंज्ञा याश्चातोर्थेत्वतन्नामगच्छंती सा दोक
मेत्वानापत्तिः । नहीच्छापिरिच्छाविषयिणी । किंच पतुल्यजातीयानुपदृक्ते सा सकैत्र क्रियापाईप्सितत्वेन तदपि क्षपापकर्षः फलभइतिवाच्यं । क्षेत्र मिच्छती स्याहावनापत्तेः ।
नहीच्छापिरिच्छाविषयिणी । किंच पतुल्यजातीयं तदेवमतियोगितां भजते । तुल्यजातीयं चकारकं न क्रिया । न च पाकादिक्रियापात्र पि संदर्शनादि क्रियापि क्षयाकर्मत्वा
कारकत्वमस्येवेतिवाच्यम् । सर्वत्र नद्रा नेमानाभावात् । भाष्योक्त सापत्ये शतइस्यादावित्र कर्मणि चतथ्यापत्तेश्चा क्रियापात्रापी । स ततमत्वेन मकर्षो पनुपपत्तेश्चेति
चेदत्राहुः । धातोः कर्मणः समानकर्तृकादिच्छायां वा इस्यनेन नप्रतियोग्यपसे निधावपि प्रहस्त्रेबोधनादिति । किंचापपयसोरनेभुक्ते इत्यादेोपपः सममतेनाकर्मत्ववारणार्थसत्रमाव
रूपकं न च करणत्वविवक्षायाः सत्वान्नदोष इति वाच्यं । धनुषा विध्यतीत्यादावपानसे तोवाधित्वावरणासंज्ञेतिभाष्यविरोधापत्तेः । शरणमपायपंप्रसवधिमतस्येवधनुषोपा एमी

१३८

साधनंमतिसाधकत्वमित्युभयोः प्रसंग इति चेत्प्रयोगलाघवं कारणमत्येवसाधकत्वमिति मन्कृतेपि द्विः पतनं। अपि च प्रकृत्व कृमादिपरिक्लिष्टे इति पश्चिमसाधकफलाश्रयत्वो
भयविवक्षायां कर्मसंज्ञा दुर्वारा। तदेव ध्वनयन्नाह। एवं तितथायुक्तमिति। धात्वर्थान्तफलशालि भिन्नाधिकरणं त्वधिनां दृष्टोदासीनानां वारणार्थं तथायुक्तमित्यस्यावश्य
कत्वेनानीप्सितग्रहणाद्वैयर्थ्यापादनस्यैव युक्तत्वं किंच तथायुक्तमिति सूत्र अकथितं चेति सूत्रे अथ्याहृस्यकमित्यग्रे निरूपयिष्यामः। आधारत्वाद्यविवक्षेति। इदं चाधिशीङ्स्थासां कर्मेकर्तु
प्सिततमं कर्मं तथायुक्तमित्यादिसूत्रविषयकमेवबोध्यं। ईप्सितादिरूपमिमित्रानां वाक्यत्वमत्र मस्पतेत्येवमाहुत्वात्। अतएवं संबंधमात्र द्वितीयापत्तिरिति अकथितं चेति सूत्र
स्यम्लकारोक्तिः संगच्छते। एवं च दिवः कर्मं चकृभिदुहोरित्यादि विषये आधारत्वाचकः त्वाभावपनदोष। द्वितीयादीनामिति। आदिनाम न्यकर्मण्यपनादरे विभाषाप्राणिषु
कर्तेः कर्मणोः कृतीत्यादिसूत्रविषयीभन्तवतुर्थ्यादयो ग्राह्याः। तत्रिरूपकं फलमिति उक्तरीत्या तस्यैव कर्तुरीप्सिततमत्वात्। आपारेति। कारकत्वकर्मयोरित्कृत्वेन तदूहितत्रि
पायाभावे न च तस्यैव स्वतंत्रतारित्यादिरिवक्ष्यमाणत्वात्। स्वादापद्दीरिति साधकतः। मपितितमशब्दश्रवणेन कारकाधिकारे गोणार्थस्यापिग्रहणात्। साक्षात्क्रियाधारेपलो
लक्ष्यकसंज्ञाभ्यां बाध इति भावः। एतेनास्मिन्नर्थे प्रयोगा एवमानमिति निरस्तम्। प्रतायोग्यापास्तम्। स हस्त्वेदं हरस्तंत्रेषु। ननु लक्ष्यतावच्छेदकस्यैवशोभनतावच्छेदकस्यापि ग्रहणात्
सीकारे बाधकाभावः। अपि च तादात्म्यसंबंधेन तदेवावच्छेदकमित्यत्र हे चेराहाककर्मणीति। भाष्यकारदिति। एतेन बुंदजानातीत्यादौ विषयत्वमर्थइयामस्त। कर्मादिद्वारा त्रिहित्यार्थस्यैव
यपदेनग्रहणात्तप्रकृतार्थत्वेनकर्मण्यपवद्धितीयेति नियमेन वारणात् तथैवाषष्ठ्येवेति नियमस्यप्रत्याच्च। निरिमेवेति। न च षष्ठीस्थले भेदेनैव संबंधस्यान्वयत्वात्तत्त्वेयुक्तमिति
वाच्यं। प्रमयमात्रस्थले भेदसंबंधस्यापि लक्ष्यत्वात्। तत्र षष्ठ्या अपि संबंधिवाचकत्वे दोषाभावाच्च। अतएव तत्पुरुषानुसम्बन्धः सर्वत्रैकरूपेणैवान्वयः। धर्ममात्रमिति। एवं बयावकेजातदस्या
दौ प्रयोगाः शक्तिवैवबोध्याः। केचित्तु कर्मत्वादो द्वितीयाघेयी कारककर्मत्वादिसंसर्गकबोधविवक्षायां षष्ठ्यनापत्तिः। शेषत्वाभावात्। न च सम्बंधसामान्यविवक्षायां षष्ठी कर्मत्वादि

बृ.श.र.
१३९
139

विवक्षायां द्वितीयादिकमिति वाच्यं। नहि निर्विशेषं सामान्यं भवतीति न्यायेन कर्मत्वाद्येव षष्ठ्यर्थ इति नियामकतास्तु करणादिना कर्मत्वादिप्रकारकबोधेपि षष्ठ्याद्युत्पत्त्या च। अत ए
वं पेणादिसंबंधसत्त्वेपि सत्तादिसंबंधविशेषतात्पर्ये चैत्रस्य नेदं यादृष्टं इति प्रयुज्यते भ्रुतिनश्चापसमर्थोनेताः षष्ठ्यर्थास्तस्येष्य प्रतियादके रेव शनव छर्थाः एकापि षष्ठी
विषयप्रकारादिघटितइत्यादिभाष्यारिष्ट्यैर्मिमतेन धर्ममात्रबोधे षष्ठी धर्मिबोधे तु तृतीयादिकमिति प्राहुः। वस्तुतस्तु धर्ममात्रेशशंतंगीकारेपि धर्मिबोधस्त्वावश्यक एव। अत ए
व सरूपसूत्रे भाष्यकारेणांकृतानास्याह तिपदार्थिक स्वार्थं न पदार्थे इति वक्तृत्वे बोधकतारूपायाः शक्तेर्दृष्टित्वेन शक्तिः स्वपिसाघपादा। अन्यथा विभक्तेरिव तन्नकृति
मतत्वं टादिशद्वेभ्योपि ज्ञातिमात्रबोधापत्तेर्वा इति हो हाथन चैषः कर्तृकरणादिरूपेन महासंज्ञाकरणसामर्थ्येन कर्त्रादिशेषे विहितानां समानार्थत्व एव साधुत्वबोधनाच्च। का
रणादिस्थलानां लोके धर्मिपरतायादृष्टत्वाच्च। आश्रयत्वेनाश्रयस्य मानानां तेषां मासत्वाच्च। तत्तुल्याश्रयिकाविद्धिः त्रिरिस्या यर्थप्रतिपादिषष्ठ्यापत्तेश्च। नचेष्टापत्तिः तिङः स
मानानार्थत्वबोधकभाष्यविरोधापत्तेः। किंचाश्रयत्वस्यान्वयोगाधिकरणत्वेन गोरवाभावः। नचैवं नश्रयतापाश्रेहे पत्ताश्रयतायाश्रपि ग्रहः स्यात पटस्य हे रष्ट्रापत्तेः नत्
ग्रहे तु न दोषशंका प्रपंचपि च्यत्ते चैतत्परिष्कृता। तात्तत्त्वफलमभिसंधायाभिमपचितमिति। त्याजनमिति। त्यजनं तु विभागानुकूलो व्यापारः स च गोनिष्ठः पयोनिष्ठो वा। आद्य
प्रधानीभूतव्यापारेण गोनिष्ठव्यापारेण वाच्यमानं त्वविभागानुकूलो व्यापारः स च गोनिष्ठः पयोनिष्ठो वा। आद्ये स्तत्वात्प्राधान्यापपत्तेः इदमेवाभिसंधाय तत्तेपपत्तिर्ध्यानयति सा
वेश्वरेव्याभिक्षावाजिभ्यो वाजिनं दूषसत्रन्तकृदेन प्राधान्यात्सप्रएव परामृश्यत इति मीमांसकाः। कर्मद्वारा व्यापाराश्रयत्वविवक्षायां अधिकरणसंज्ञा। अजादीनामप्राधान्यव्यवहा
रस्तु नपनस्याभोदृश्यत्वाभिप्रायेण। अत एव गोरोकर्मणि दुग्धहारेरित्यस्य चारितार्थ्यमप्राज्ञं तेपद्य पिप्रयोज्यव्यापाराश्रमात्रदृश्यकः प्रयोजकव्यापारः प्रयोज्योदृश्यकः तथापी ह
च विषयेषु पयः प्रभृतीनामेवोद्दृश्यतानां तथैवानुभवात्। अत एव गवादौ तथात्वात्मिसनेन कर्मत्वं अंसेन गोरेव प्राधान्यं दुग्धोदृश्यानेव दोहनस्य प्रकृतत्वात्। तस्मिन्नपि कर्मणि लका राम
१३९

रः स्यादिति शंकानिरासार्थं वचनारम्भः। अपादानत्वाविवक्षायां तथा उक्तमिति सम्प्रवृत्तिः। एतेन कर्तुरीप्सिततमम् इत्यनेनैव सिद्धो न तथा उक्तम् इत्यस्यायं न्यासोऽव्यर्थेऽस्यास्त
मित्यादि प्रपञ्चयिष्यामः। दायनमिति। नच प्रयोजकसंप्रदानकर्मैवेति नायमहः। पुत्रार्थं कन्यां पाचतइत्यादावन्यस्यापि दर्शनात्। अङ्गीकारणमिति। अविनीतं विनयं याचते इति विनय
मङ्गीकारयतीत्यर्थः। विक्लेदनं पचेति। विक्लित्त्यनुकूलव्यापारोपसर्जनीभूतव्यापारो विक्लेदनं शब्दार्थः। [illegible]
[illegible] र्थः। तत्र विक्लित्त्यनुकूलव्यापारस्तण्डुलाश्रितः। तदुपसर्जनीभूतव्यापारो देवदत्ताश्रितः। स च व्यापारः ओदननिष्ठादनं विक्लित्तिनिष्ठा
दनं वा। आद्ये द्विकर्मकत्वात् तण्डुलनिष्ठव्यापारवाच्यत्वे उत्पत्तेर्वाच्यत्वे तण्डुलकर्मतैव। विक्लित्तिव्यापारयोर्जन्यजनकभावः संसर्गः। उभे निरूप्य फलवाचकत्वे विक्लित्तेः क
रणत्वेनान्वयेन तु ओदनकर्मतैव विक्लित्तिः फलोपलक्षणं। गौरिको पचति फलं पचतीत्यादौ विलक्षणप्रतीतेः। ध्वनितं चेदं कर्तुरीप्सिततमम् इति सूत्रस्थभाष्यकैयटयोः।
इत्यादीति। प्रवेशोपसर्जनमवस्थापनं तदेः आत्मापनं दृष्टेः। सोच नं विज्ञः। नवनीतनिःसरणफलकव्यापारफलकव्यापारो मथ्यर्थः। परत्वादिति। ग्रामादायातीत्यादौ
ग्रामादिनिष्ठविभागस्य धात्ववाच्यत्वेन तत्तत्समवेतत्वाभावादपादानसंज्ञाप्राप्त्यवकाशः। कर्मसंज्ञा प्राप्ता तु ग्रामं गच्छतीत्यादौ। पंचम्या अवधित्वं द्वितीयया फलाश्रयत्वं प्रतीयते
यमिति विवक्षयोर्युगपदसंभवेन भाष्यग्रन्थाप्युक्त एवेत्याशंक्याह। पंचकमिति। गोशब्देनैव मतियाद्यमिति विवक्षायाः सत्वान्न दोष इति भावः। आरोपयते प्रियप्रयोजकव्या
पारविषयापयोर्न्यस्यादेः शरूपत्वमिति। पक्षे कर्तुरीप्सिततमम् इत्यस्यैव प्रवृत्तिर्बोध्या। पक्षान्तरे तु तथा युक्तमिति बोध्यम्। ग्रामादायातीत्यादौ विभागस्य धात्ववाच्यत्वेन न तथा
युक्तत्वात् अवधिभूतात्। तथा चेदृशे विषये आकडारादेका संज्ञेति सूत्रबलात् उभयोर्हि तयोर्विघातिकेति भावः। कर्मणोऽत्रेति। यद्वा तु पयः कर्तृकनिःसरणानुकूलव्यापारे दुहिर्वर्त्त
ते। तदा पादानत्वाविवक्षायामिति बोध्यम्। ननु दुहादियोगे कारणादीनामपि कर्मत्वं दुर्वारं। न चाकथितशब्दो नामधानपरः किन्तु क्रियाशब्दोऽकीर्तितपर्यायः इति वाच्यं। का

गत्वाद्यविवक्षायां दोषस्स्फुट एवेत्यादि रितिचेन्न । तथा प्रयुक्तमित्यनुवर्तमाने सिद्धे तद्बहुलं पात्तफलशालीत्यर्थे दोषाभावात् । लक्ष्यानुरोधेन योगविशेषस्यैव ग्रहणाच्च । ध्वनि
तं चेदं उपयोगे निमित्तं । गुणोनयत्नकृतरत्यादिनाकरग्रन्थे । निर्मलरति । ननु इदं उपग्रहणार्थमिति भावन्निर्विवादं । एवं च तत्समानार्थकत्वेन ग्रहणात् पूर्वोत्तरमेवेति चेत्स्तो अते
स्वसंप्रदानकरणापन्नग्रहेरर्थः संप्रदानसंज्ञानुकृतसंज्ञायान्न । अन्यायापादि पूर्वकस्य सं+प्रदानकरणापन्नंदर्थेः इति समानार्थत्वाभावः । अत एव भूशास्त्र जिनी हृवह
कृञ्चुपां ग्रहणादिवरितार्थी प्रतिपादनं अन्योऽर्थः न हि शेषश्च शासः नत्थेवानुभवान् । शोधनाः प्रापणमर्थः । शरीरापासपूर्वकं तु वहधातोः कुर्वन्स्वावलात्का एवं
कंग्रहणां तु हरतेः । व्यापपूर्वकं ग्रहणां विधातोः प्रणतोनत्वं वैकल्यपेरितिदिक् । अयुक्तमिति । पुनः हृमिस्यन्नसत्तमन्नस्मीममामानयुक्तः कारका पापस्यां मनन्नधानाद
दुग्धेहावर्थासंगतिः शक्तस्य तन्त्रैवावस्थितत्वेन द्विपरस्पवेयथ्यापत्तेश्चोपराक्रमधातनार्थे जहारेत्यस्यप्रयुक्तत्वाच्च । एवं चेति । पत्तुन्याय सिद्धोपमर्थोन वाचनिकः । नी
प्रभृतीनां प्रधानकर्मसंबंधीनगः । दुह्यादीनां तु विपरीतमित्याकरे उक्तत्वात् । एवं चानिष्ठापत्त्यानुनयुक्तमेवेत्याहुः । तत्र विपरीतार्थस्याप्यापादपितुशक्यत्वेनाकरस्य थाना
म शाङ्क्यत्वात् । अस्मतादीनां मुख्यप्रधानयोधायम्यस्य सत्वाच्च । न्यायसिद्धत्वादेकवाक्यानुकूलकमप्यपठितुयक्तत्वाच्चेतिदिक् । अर्थिनरति । पत्तु अर्थी स्यात्तीसर्थी । हिरण्येनस
पेदृत्वतीया । हिरण्याभिन्नधनवं नरस्त्यर्थइति । तन्न । हिरण्येनेतत्र हसनापत्तेः अर्थ्याचासन्निहितत्वेनेनासन्निहितं प्रत्यपविधोनाच्चा । तन्नास्ति निविरोधात्रसंबध्यतेतकेकौ इ
पूर्व्ययनस्सूपाधिकादिनेरभावरतिस्पष्टप्राकरोक्ष भेदेत्तृतीयायाश्च विधानाच्च । सविशेषणत्वेनन नहितद्वत्तेरनापत्तेस्स्वाधनवाचिनोर्थशन्दादिनिष्ठतोरभावइति प्राप्या
र्येत पामत्वर्थीयांतेवैष्णव ठ हरदत्तादिभिः स्पष्टतया अभिधानाच्च । तस्मादयेन मर्थः प्रार्थी नोमापस्त्यालिनोर्थी । हिरण्येनेति कृत्यात्वविवक्षयात्तृतीया । हृतएवंकिं ट
तित्याहविवक्षानायामन्वपरतिदिक् । तन्नतांतरेति । इदं च परं संतोषमात्रं वस्तुतस्तु मेतांतरे ममाणाभावएव । यन्नु तं तुल्यानोदनं पचति । तिप्रयोगस्याकथितं चेति स राम

त्रेणोवोपपत्तौ पचेर्द्व्यर्थत्वात्तण्डुलानां विक्लेदनेऽप्योदनस्य निर्दिष्टत्वात्कर्मत्वमिति भाष्यकारोक्तमर्थः स्यादिति। तस्मात् ततः पचेर्द्विकर्मकत्वाहानात्। किंचाकथितशब्दो
न्यायादानादिभिरनुक्तिपरः अपादानादृपश्च दिनिगमनाविरहात्सर्वेऽन्तराः सर्वोऽरम्यते। दुह्याचिप्रच्छिभिक्षिचित्राममुपयोगनिमित्तमपूर्वविधाविति भाष्या
न्थेवनिर्णायानात्। पूर्वं प्रपादानादीनामेवापस्थितत्वेन तथैवयुक्तत्वाच्च। एवं त्वंचनपाठाये सं। किंतु प्रकृतसूत्रभाष्यपेक्षया। अविवक्षातः एवं नाम प्राप्तत्वा
त् एतेन नवृत्त्यमाणपो हि तु कर्त्ते संज्ञयोर्विषये ऽतिप्रसंगख्यादि निपरोक्त। परोभ्यां हेतुकर्तृसंज्ञाभ्यां कर्मसंज्ञापाबाधाच्च। एवं च तण्डुलानां कर्मत्वं सपादनार्थभाष्यो
क्तकल्पनापि आवश्यकत्वेन नैव प्रयुक्ती। अकथितं चेति सूत्रं तु कर्मत्वाविवक्षायां न चाकथितशब्देऽभ्यासात्पर एवेति नाचेत्। अकथितशब्दस्य प्रामाण्यसिद्धत्वात्। क
थयाक्य प्रबंधरतिस्मरणविरोधाच्च। संयोगवह्निप्रयोगस्यापि विशेषाव्यगति हेतुत्वेनापादानादिसंज्ञाप्रयोगपत्तयापि आवश्यकत्वाच्चेति दिक्। अधिकरिति। श्रुविशा
निगुणीनेस्य सूत्रस्येति शेषः। नाहृस्याहिरते श्वापीत्यत्र स्येन हृषिः संग्रहेति। गसमर्थानां तथैव वचस्यत्र स्ये नरयंतत्यात्पादिस्वं प्रयुः। एवं समभिव्याहृतपदेरिति विशेषणात्सिद्धि
र्कत्व एवं काद्गमस्मकरोतीत्यत्र दिकृत्वात्। काद्यानि विकुर्वन्नमस्योत्पादयतीत्यर्थात्। एतेनन्यादीनामकथितत्वेनेति सूत्रविषयतानेत्यपास्ता। द्विकर्मकाणां प्रधानकर्मणि
लादयः। उततौ गोणाविति विचारस्यात्रैव भाष्ये प्रकृतत्वेन द्विकर्मकेषु पूर्वोत्तरसूत्रविषयतायाध्वनितत्वाच्च गुणकर्मणि लादिविधिः सपेरिति भाष्यग्रन्थस्य समभिधाना
सिद्धं वाप्यन्त्यकर्मणा दृष्यादीनामप्युत्तरमभिधानाच्चा। अह मर्यादमिति। प्रकारा मन्निचेतितरदूति परस्मैपदानामिति सूत्रस्य भाष्यप्रयोगो विधाने। एतेन रहा सर्वत्र
राष्यः स्यात्स्यादूच त्वामिशके हरिं। साध्यमानोऽन्यं गच्छेदूध्योदाप्यन्तरतन्द्रुन भिमादि सरति प्रयोगव्याख्यातः। परिवेदापनार्थस्योक्तत्वेन तत्समानार्थत्वात्। नेच प्रयोज्य
कर्तुः कर्तृत्वाविवक्षायां संबंधमात्रा येनान्वपेकर्तुः प्रयोजकत्वाभावेनेहेतत्वाभावात् स्मिचतुर्लभट्टनिदाखः। अंतरंगत्वेन णिजनुत्पत्तौ बाधकाभावात्। अत एव गसी

बृ. शा. २
१४१
141

रिसत्रेसंगच्छते। अत एव णिजंते ग्रामादीनां कर्मत्वं हेतुसंज्ञादिविधौ कर्त्रेपरस्य प्रकृतधातूपात्तव्यापाराश्रयफलभागत्वात्। एवं प्रयोजकपरैर्यो साधयत्येवविकल्पपिष्यामः॥
अत एव भुक्तो हारं चिरपरिचितं सा जिते दैवगतो व्याप्ति सिद्धो त्याजनत्वे हेर्थे युक्तं त्वे न तुल्यार्थत्वात्तानवांतः स्थितवत्तेन स्याज्जनेर्हेः प्रयोगः स्याजीति त्विजंतस्य सकर्मके
तिप्रभाना र्थत्वाभाव इति वाच्यं तावता पि दृष्टं वपरेनस्य प्रयोगेन हेहसमानार्थत्वान्न यापातः। भागुरुक्तस्य पकत्वस्य विशेषाये श्रुति नो हेतुमति जंतत्र एव प्रकृते। धुनिते चेदं
केय्यटमाधवादिग्रंथेषु स्पष्टम् आमित्याहुः। नचैवं दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ विनिकारिकायां याचिग्रहणं व्यर्थमिति वाच्यं अन्यत्र
यार्थग्रहणेन चानीतार्थाना विनण्ताउ भेदमाश्रित्याप्य पायानुनयतीत्यर्थात्। अत एव हियाचौ वग्रहणं तस्यानेकार्थत्वाद्विशेषग्रहणं भविष्यतीति चेदत्राहुः। अर्थभे
देन शब्दभेदमाश्रित्यानुनयार्थस्यैव याचिग्रहणादिति॥ वस्तुतस्तु अर्थभेदेपि शब्दैकार्याणि कार्याणि शब्दभेदेपि विनिगमनाविरहादुभयोरपि ग्रहणं तत्र याग्रहणेनैवानु
नयार्थग्रहणसिद्धेश्च भिक्षिग्रहणं स्पष्टार्थं धुनि तं चेदं कैयटभट्टमतं यो। स्वतंत्राः किन्तु मन्त्रा यार्थेकचकारेण ग्रहणाद्योरपे स्माजेश्च ग्रहणमिच्छन्ति। अप्ये
तुप्रकथितं चेत्यस्य त्रेतथा एवमुक्तमित्यस्यानुवर्त्तनेन धातूपात्तफलशालिकर्मान्वयित्वे बप्रच्रेः सत्वेन दुहादिप्रयोगणानस्य नात्र फलमित्याहुः। मित्याहुरिति। आदिनाममा
नोदिदेशयितत्रो बोदात्तरित्तिवोध्यं। विनिगमनाविरहादधिकरणाविवक्षापांक्रुहुपचालादिभिन्नेव नम वर्त्तते रसभ पच्यते। प्रसंगादिति। ननु ग्रामादीनां व्याप्तिर्यो
